रघुवंशः संजीवनी समाख्य व्याख्या सहितः

५७२

३०

साग्निः सोपास्तेनोत्र्जेदिति उयस्तंभं ध्वजाकारं राजद्वारे प्रतिष्ठितं आहुः शक्रध्वजं नामधेयोरलोकस्तु खवावहम् हूविरामीहत्नमे
नत् नहन्तरां रसद्युगाहूयैनोमोम्नैनागोपदाहूविरामीतदेति ७० इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्याय
कोलाचलमल्लिनाथसूरिविरचितायां संजीविनीसमाख्यायां तृतीयः सर्गः ॥३॥ शारदा शारदांभोजवदना वदनाम्बुजे
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् सइति स रघुर्गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापालनात्मकं पुरोहिता
हूनादित्वाद्यक् प्रत्ययः प्रतिपद्य प्राप्य दिनान्ते सायंकाले सवित्रा निहितं तेजः प्रतिपद्य हुताशनोऽग्निरिव अधिकं बभौ
सौरं तेजः सायमग्निं संक्रामति आदित्यस्तु अस्तमयन्नग्निमनुप्रविशति अग्निं वा आदित्यः सायं प्रविशतीत्यादिः श्रुतिः
प्रमाणम् १ दिलीपेति दिलीपानन्तरं राज्ये प्रतिष्ठितमवस्थितं रघुं निशम्याकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रव

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ दिनान्ते निहितं तेजः सवित्रेव हुताशनः १ दिलीपानन्तरं राज्ये तं निशम्य ई८०
प्रतिष्ठितम् पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः २ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्था ट्टि
नदर्शिन्यो ननंदुः सप्रजाः प्रजाः ३ सममेव समाक्रांतं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्यमखिलं चारि ष्टि म

वैराग्यमोऽस्य संजातः प्रधूमितोऽग्निः संतापाग्निरुत्थित इव प्रज्वलित इव वृद्धो वाभ्यधिकं संतापोऽभूदित्यर्थः राजकर्तृकस्या
पितिशमनस्याग्नौ उपचारान्नासमानकर्तृकत्वविरोधः २ पुरुहूतेति पुरुहूतध्वज इन्द्रध्वजः स किल राजभिः वृ
ष्ट्यर्थं पूज्यत इत्युक्तं भविष्योत्तरपुराणे एवं यः कुरुते यात्रामिन्द्रलोके युधिष्ठिर पर्जन्यः कामवर्षी स्यात्तस्मिन् राज्ये न संश
य इति उच्छ्रितं स्तंभं ध्वजाकारं राजद्वारे प्रतिष्ठितम् आहुः शक्रध्वजं नामधेयं पौरलोकसुखावहम् पुरुहूतध्वजस्येव तस्य
रघोर्नवाभ्युत्थानमभ्युपचयं नवाभ्युत्थानदर्शिन्यः ऊर्ध्वप्रस्थिता उल्लसिता नयनपंक्तयो यासां ताः सप्रजाः ससंता
नाः प्रजाः प्रजा स्यात्संततौ जने इत्युभयत्राप्यमरः ननंदुः ३ सममिति द्विरद इव द्विरदे ... गच्छतीति द्विरदगामिना
कर्त्रे क्षुपमानेऽप्यजातावितिणिनिः तेन रघुणा सममेकयुगपदेव द्वयं समाक्रांतं ॥ द्विरदगामी तेन

विहितं किंतत्द्वयं पित्र्यागतं पित्र्यं पितुरागतमितियदितियन्वयः सिंहासनमखिलंवाङ्मयं च अखिलमहीमंडलं वाङ्मयं च ४ अथ
सिंहासनारोहणानंतरं तस्य लक्ष्मीसन्निधानमाह छायेति अत्र च्छोतिताऽविशेषेणात्वयं सन्निहितया लक्ष्म्या छत्रधा
रणं कृतमित्युत्प्रेक्षते पद्मा लक्ष्मीः लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रियेत्यमरः सा स्वयमदृश्या किल किलेति
दे॰वे॰ संभावनायां सती छायामंडललक्ष्येणकांतिपुंजानमेयेन तं छायास्वरूपेणोदृश्येन छायामण्डलमित्यनेन अतपा
टी॰३८ त्रज्ञानेदृश्यते छायात्वर्धाद्द्युतिर्याकांतिः प्रतिबिंबमनातपस्तुभयत्राप्यमरः तेन पद्मातपत्रेणापद्ममेवातपत्रं तेन कर
38 णाभूतेन सम्राज्यसाम्राज्यकर्मणि महीमंडलाधिपत्ये दीक्षितं अभिषिक्तं भेजे अन्यथा कथमेतादृशीकांतिसंपत्तिरि
तिभावः ५ संप्रति सरस्वतीसान्निध्यमाह परिकल्पितेति सरस्वती काले काले सर्वेष्वपि योग्यकालेषु नित्यंवीप्स

छायामण्डललक्ष्येणतमदृश्याकिलस्वयम् पद्मापद्मातपत्रेणाभेजे साम्राज्यदीक्षितम् ५ परिकल्पित
सान्निध्याकालेकालेचवन्दिषु स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्ता
यद्यपिराजभिः तथाप्यऽनन्यपूर्वैवतस्मिन्नासीद्वसुंधरा ७ सहिसर्वस्यलोकस्ययुक्तदण्डतयामनः

योगेतिवीप्सायां द्विर्वचनं वंदिषु परिकल्पितसान्निध्या कृतसन्निधाना सती स्तुत्यं स्तोत्रार्हं रघुं समर्थ्याभिरर्थ्याद
नपेताभिः धर्मपथ्यर्थन्यायादनपेते इति यत्प्रत्ययः स्तुतिभिः स्तोत्रैरुपतस्थे देवताबुद्ध्या पूजितवतीत्यर्थः देवता
त्वं च नाविस्तः पृथिवीपतिरिति वा लोकपालात्मकत्वाद्वेत्यनुसंधेयं एवं च सति तउपाद्देवपूजासंगतिकरणमित्र
करणपृथिवीतिवर्द्धमानादात्मनेपदं सिध्यतीति ६ मनिवति वसुंधरा मनुप्रभृतिभिः मन्वादिभिर्मान्यैः राजभिः
भुक्ता यद्यपि भुक्तैवेत्यर्थः यद्यपीत्यवधारणे अप्यर्थे यदि वार्थे स्यादिति केशवः तथापि तस्मिन्राज्ञि अन्यः पू
र्वो यस्याः सा अनन्यपूर्वा न भवतीति अनन्यपूर्वा अनन्योपभुक्तेवासीत् तत्प्रथमपतिकेवानुरक्तवतीत्यर्थः ७ ३८
अत्र कारणमाह सहीति हि यस्मात्कारणात् स रघुः युक्तदण्डतया यथापराधदण्डतया सर्वस्य लोकस्य ॥

अनन्यपूर्वा×

मनः आददे जहार कथमिव अतिशीतोष्णः न भवतीति नातिशीतोष्णः नञर्थस्य नशब्दस्य सुप्सुपेति समासः दक्षि-
णो दक्षिणदिग्भवो नभस्वान्वायुरिव मलयानिल इवेत्यर्थः युक्तदण्डतयेत्यत्र कामंदकः उद्वेजयति तीक्ष्णेन मृ-
दुना परिभूयते दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते इति ८ मंदेति तेन रघुणा प्रजा गुरौ दिलीपे विषये आम्र-
श्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः तस्य फलेन पुष्पोद्गमे पुष्पोदये इव ततोऽपि गुणाधिक्यात् नयादिना मंदो-
त्कण्ठाः अल्पोत्कण्ठाः कृताः गुणाधिक्ये रघुरुत्कण्ठाविषयः पूर्वं विस्मारयतीति भावः ९ नयविद्भिरिति शास्त्रज्ञैर्नवे तस्मि-
न् राज्ञि विषये तमधिकृत्येत्यर्थः सच्च असच्च सद्गुणादिकं असत् दुष्टादिकं चोपदर्शितं तस्मिन् राज्ञि पूर्व पक्ष एवाभवत्

आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ८ मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ फलेन सहकारस्य
पुष्पोद्गम इव प्रजाः ९ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १०
७५ पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः नवे तस्मिन्महीपाले सर्वं नवमिवाऽभवत् ११ यथा प्रह्लादनाच्च-
न्द्रः प्रतापात्तपनो यथा तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् १२

त्तरो न इत्यर्थः तत्र सदसतोर्मध्ये सदेवाभिमतं नासज्ज्ञात्वा नेत्वहानार्थमेवेत्यर्थः पक्षः साधनयोग्यार्थः पक्षः पार्श्वगु-
रुत्साध्यसहायबलभित्तिषु इति केशवः १० पंचानामिति पृथिव्यादीनां पंचानां भूतानामपि गुणाः गंधादयः उत्कर्षम-
तिशयं पुपुषुः अत्रोत्प्रेक्षते तस्मिन्नवीनाम्नि नवे महीपाले सर्वं वस्तुजातं नवमिवाभवत् तदेव भूतजातमिदानी-
मपूर्वगुणयोगादपूर्वमिवाभवदिति भावः ११ यथेति यथा चंद्रः यस्मात् ह्लादयतीति चन्द्रः इन्दुः चदिधातोरौणादिको रक्प्रत्ययः
प्रह्लादनादाह्लादकरणादन्वर्थो नगनामिनामकोऽभूत् यथा च तपतीति तपनः सूर्यः नंद्यादित्वाल्ल्युप्रत्ययः प्रता-
पात्संतापजननादित्यर्थः तथैव राजा प्रकृतिरंजनात् अन्वर्थः सार्थकः राजशब्दोऽभूत् यद्यपि राजशब्दो राजतेर्दी-

र॰व॰
टी॰ ३९
39

कामममिति विशालेतस्यरघोर्लोचनेकामंकर्णान्तयोर्विश्रांतेकर्णप्रांतगतेस्यातां अतएवचक्षुष्मत्तानचक्षुः फलमित्यर्थः
सूक्ष्मान्कार्यार्थान्दिवहरणीतिकर्तव्यार्थान्दर्शयतिप्रकाशयतीतितस्मात्सूक्ष्मकार्यार्थदर्शिनतस्यशास्त्रेणैवशास्त्रदृष्टि
विवेकिनामितिभावः १३ लब्धेति अथलब्धस्यराज्यस्यप्रशमनेनपरिपंथिनांअनुरंजनप्रतीकाराभ्यांस्थिरीकर
णेनस्वस्थंसमाहितचित्तमेनंरघुंपंकजलक्षणापद्मचिह्नाश्रियोपिविशेषणमेतत् शरद्द्वितीयापार्थिवश्रीः राज्यल
क्ष्मीरिवसमुपस्थितासंप्रा…योरंजनस्यदेशनगरग्रामेषुशुश्रूषितत्वात्प्रयायोथानामपिसंग्रहोपितुलयोमार्गव्यवस्थाप
नेसाम्यंलिप्सुदीनदुःखितकरणांत्यागः समानचनेनकार्यारोपवमहीभुजांप्रशमनान्येतानिराजेषुनवे १४ निर्वृष्टेतिनिः

कामंकर्णांतविश्रांतेविशालेतस्यलोचने चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिनः १३ लब्धप्रशमनेस्व
स्थमथैनंसमुपस्थिता पार्थिवश्रीर्द्वितीयेवशरत्पंकजलक्षणा १४ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःसहः
प्रतापस्तस्यभानोश्चयुगपद्व्यानशेदिशः १५ वार्षिकंसंजहारेंद्रोधनुर्जैत्रंरघुर्दधौ प्रजार्थसाधने
तौहिपर्यायोद्यतकार्मुकौ १६ पुंडरीकातपत्रस्तंविकसत्काशचामरः ऋतुर्विडंबयामासनपुनःप्रापत

शेषवृष्टाः निर्वृष्टाः कर्त्तरिक्तः अतएवलघवः तैर्मेघैर्मुक्तवर्त्मात्यक्तमार्गः अतएवसुदुःसहः तस्यरघोर्भानोश्चप्रता
पः पौरुषमानस्य प्रतापोप्रतापः पौरुषमानाविति यादवः युगपत्दिशोव्यानशेव्याप १५ वार्षिकमितिइंद्रोवर्षासु
भवंवार्षिकंवर्षाभ्यष्ठगितिठक्प्रत्ययः धनुः संजहाररघुर्जैत्रंजयनशीलंजेतृशब्दात्तृन्नंतात्
प्रज्ञादिभ्यश्चेतिस्वार्थेअणप्रत्ययः स्वार्थेधनुर्दधौहियस्मात्ताविंद्ररघूप्रजानामर्थस्यप्रयोजनस्यवृष्टिविजयल
क्षणस्यसाधनविषयेपर्यायेणक्रमेणउद्यतेकार्मुकेयाभ्यांतौपर्यायोद्यतकार्मुकौपाठांतरेपर्यायेणक्रमेणविश्रमस्य
योस्तौपर्यायोद्यमविश्रमौइंद्रयोः पर्यायकरणादल्लोशइतिभावः १६ पुंडरीकेतिपुंडरीकंसितांभोजमेवातपत्रं

३९

नराजस्तमात्मेव चामरग्राहिण्यस्य तयोक्तः ऋतुः शरद्रूपः पुण्डरीकविभातपत्रं काशनिभचामरं तं रघुं विडंबयामास अनुचकार तस्य रघोः श्रियं पुनः शोभां न प्राप यशोभा तस्य पत्रिपद्मात्सलक्ष्मीः श्रीविवक्षप्रतश्शतिशाम्यतः १७ प्रसादेति प्रसादेन स्वमुखे
तस्मिन्नवेविशदप्रभे निर्मलकांतौ चन्द्रे च द्वयोर्विषये तदा चक्षुष्मतां प्रीतिरनुरागः समरसा सममस्वादाद ल्पभोगेन।
यावत् रसोगंधरसस्वादेशतिविश्वः आसीत् १८ हंसेति हंसानां श्रेणिषु पंक्तिषु तारासु नक्षत्रेषु कुमुदानि येषु संति कु
मुदप्रायेषित्यर्थः कुमुद्वान्कुमुदप्राय इत्यमरः कुमुदनद्वेतसेभ्यो ड्मतुप् तेषु वारिषु च नदीयानां रघुसंबंधिनां य
शसां विभूतयः संपदः पर्यस्ताइव प्रसारिताः किमित्युत्प्रेक्षा अन्यथा कथमेषामेषयवलिमेतिभावः १९ इक्ष्विति इ

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः १८ हंसश्रेणिषु तारासु कुमु
द्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसामिव १९ इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयम्
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः २० प्रससादोदयादम्भः कुम्भयोनेर्महौजसः रघोः परिभवाशंकि १८

इक्षूणां छाया इक्षुच्छायं छाया बाहुल्ये इति नपुंसकत्वं तन्निषसाइव इक्षुच्छायानिषादिन्यः स्त्रीलिंगपाठे इक्षोः छाया इति
विग्रहः अन्यथा बहुत्वे नपुंसकत्वप्रसंगात् षद्लृ अप्रयोगे आसमंतान्निषादिन्यः शालीन्गोपयंति रक्षयंति इति शा
लिगोप्यः सस्यपालिकाः स्त्रियः कर्मण्यण् टिड्ढाणञ् इत्यादिना ङीप् गोप्तुः रक्षकस्य तस्य रघोः गुणाभ्युदयः उदयो यस्य तं गु
णोदयं गुणोत्पन्नं आकुमारं कुमारमारभ्य कथोद्घातः कथारंभो यस्य तत् कुमारैरपि स्तूयमानमित्यर्थः यशो जगुः
गायंति स्म अथवा कुमारस्य तस्य रघोः आ कथाः इंद्रविजयादयः तत आरभ्य आकुमारकथं तत्रापि विविधविधावव्य
यीभावः आकुमारकथं उद्घातो यस्मिन्कर्मणि गानक्रियाविशेषणमेतत् स्यादभ्यादानमुद्घात आरंभ इत्यमरः।
आकुमारकथोद्घातमिति पाठे कुमारस्य कथाभिः स्तुतिभिः उद्घातं यशः न यशः आरभ्य यशो जगुरिति व्याख्येयम् २०
प्रससादेति महौजसः कुंभयोनेः अगस्त्यस्य अगस्त्यः कुंभसंभव इत्यमरः उदयात् अंभः प्रससाद प्रसन्नं बभूव महौजा।

रघं॰
टी ४॰
40

मदेति मदोदग्रा मदोद्धताः ककुदो येषामस्तीति ककुद्मंतः महाककुद इत्यर्थः यदि वा गरोगपाठान्नस्य वत्वाभावः सरितां
कूलानि उद्रुजंतीति कूलमुद्रुजा महोक्षाः बलीवर्दाः उदि कूले रुजिवहोः इति खश् प्रत्ययः अरुर्द्विषजंतस्य मुम् म
होन्नउक्षाणः महोक्षाः अचतुरेत्यादिना निपातनादकारांतः लीलालेखं विलासस्य भंगं तस्परेखो कृतस्य हवितो वृ
षभान्तः पराभंजकस्य विक्रमं शौर्यम् अन्वप्रापुः अनुचक्रुः २२ प्रसवैरिति मदस्येव गंधो येषां ते मदगंधिभिः उपमाना
च्चेति समासांतः इकारः सप्तपर्णानां वृक्षविशेषाणां सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः प्रसवैः
पुष्पैः आहताः तस्य रघोर्नागा गजाः गजोपि नागमातंगावित्यमरः असूययेवस्य हमानतिभिन्न यास्पर्द्धयेव स

मदोदग्राः ककुद्मंतः सरितां कूलमुद्रुजाः लीलालेखमनुप्रापुर्महोक्षास्तस्य विक्रमम् २२ प्रसवैः सप्त
पर्णानां मदगंधिभिराहताः असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २३ सरितः कुर्वती गाधाः पथश्चाश्या
न कर्दमान् यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत् २४ तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षि

धैव प्रसुस्रुवुः मदं ववृषुः प्रतिगजगंधाभिमानादिति भावः करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिरिति पालका
प्येकरान्नासारंध्राभ्यामित्यर्थः २३ सरित इति सरितो गाधाः सुप्रतराः कुर्वती पथो मार्गांश्च अश्यान् कर्दमान् शुष्क
पंकान् मार्गान् कुर्वती संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं शरत् शरदृतुः तं रघुं शक्तेः उत्साहश
क्तेः प्रथमं प्राक् यात्रायै चोदयामास प्रेरयामास प्रभुमंत्रशक्तिसंपन्नस्य शरत्समय उत्साहमुत्पादयामासेत्यर्थः २४
तस्मा इति वाजिनामश्वानां नीराजनाविधौ नीराजनाख्ये शांतिकर्मणि सम्यग्विधिवद्धुतो होमसहितो वह्निः प्रगत
दक्षिणा प्रदक्षिणमिति तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः प्रदक्षिणा या अर्चिः ज्वाला तस्याः व्याजेन हस्तेनेव तस्मै जयं द
दौ उक्तं महायात्रायां इत्युक्तं प्रदक्षिणगतो हुतभुक् पस्य धात्रीं समुद्रवसनां वशगां करोतीति वाजिगृहणं गजादीनाम
प्युपलक्षणं तेषामपि नीराजनाविधानात् २५ स इति गुप्तो मूलं स्वनिवासस्थानं प्रत्यंतः प्रोतदुर्गं च येन स गुप्तमूल
प्रत्यंतः गुप्तपार्ष्णिः उद्धृतषड्विधशत्रुः सेनया रक्षितपृष्ठदेशो वा आश्रयान्वितः शुभैर्दैवान्वितः अयः शुभावहो विधिरित्यमरः

दिरूपंबलंसैन्यंमौलंभृत्यंसुहृच्छ्रेणिद्विषदाटविकंबलमित्यमरः आदायदिशांजिगीषयाजेतुमिच्छयाप्रतस्थे २६ अवाकि
रन्निति वयोवृद्धाः पौरयोषितः तंरघुंप्रयान्तंलाजैराचारलाजैः मंदरोद्धूतैः पृषतैर्विन्दुभिः क्षीरोर्मयः क्षीरसमुद्रोर्म्मयः अ
च्युतंविष्णुमिवअवाकिरन्नभ्यवर्षन्‌ २७ प्राचीनवर्हिर्नामकश्चिन्महाराजः इतिकेचित्‌ इन्द्रः यथैन्द्रोमघवाहृ बाहरिह
यः प्राचीनवर्हिस्तथेतीन्द्रपर्य्यायेषुहलायुधाभिधानात्‌ तेनतुल्यः सरघुः अनिलेनानिलोद्धूतैः केतुभिर्ध्व-
जैः अहितानरीन्‌ तर्ज्जयन्निवभर्त्सयन्निवतर्ज्जिभर्त्स्योरनुदात्तत्वेचाज्ञेडेःप्रिकरणेनोनुदात्तत्वनिमित्तस्यात्मने-
पदस्यानित्यत्वज्ञापनेनात्परस्मैपदमितिवामनः प्रथमंप्राचींदिशंप्रययौ २८ रजोभिरितिकिंकुर्वन्‌स्यन्दनोद्धूतैः र

सगुप्तमूलपर्य्यन्तः शुद्धपार्ष्णिरयान्वितः षड्विधंबलमादायप्रतस्थेदिग्जिगीषया २६ अवाकिरन्वयोवृद्धा
स्तंलाजैः पौरयोषितः पृषतैर्मन्दरोद्धूतैः क्षीरोर्म्मयइवाच्युतम्‌ २७ सययौप्रथमंप्राचीन्तुल्यःप्राचीनवर्हि
षा अहितानानिलोद्धूतैस्तर्ज्जयन्निवकेतुभिः २८ रजोभिःस्यन्दनोद्धूतैर्गजैश्चघनसन्निभैः भुवस्तलमि
वव्योमकुर्वन्व्योमेवभूतलम्‌ २९ प्रतापोग्रेततःशब्दःपरागस्तदनन्तरम्‌ ययौपश्चाद्रथानीकंचतुःस्कन्धेवसाच मूः

जोभिर्घनसन्निभैर्वर्णतः क्रियातः परिमाणतश्चमेघतुल्यैर्गजैश्चयथाक्रमंव्योमआकाशंभुवस्तलमिवभूतलंच
व्योमेवकुर्वन्ययावितिपूर्वेणसंबन्धः २९ प्रतापइति अग्रेप्रतापस्तेजोविशेषः सप्रभावःप्रतापश्चयत्तेजःकोशद
ण्डजमित्यमरः ततःशब्दःसेनाकलकलः तदनन्तरंपरागोधूलिः परागःपुष्परजसिधूलीस्नानीययोरपीतिविश्वः
पश्चाद्रथाश्वादिरथाश्वादिचतुरंगवलंइतीसेचकस्कन्धेवचतुर्व्यूहेवःस्कन्धःप्रकाण्डेकायेंसोविज्ञानादिषुपंचसुनृपे
समरेव्यूहेचेतिहेमः साचमूर्ययौरथानीकमितिपाठेइतिशब्दाध्याहारेणयोज्यम्‌ ३० मरुविति सरघुःशक्तिमत्वात्स
मर्थत्वात्मरुपृष्ठानिनिर्ज्जलस्थानानि समानौमरुधन्वानावित्यमरः उदंभाकृतजलानिचकारनाव्याभिर्नौभिस्तार्य्यान
दीनाव्यंत्रिलिंगंनौतार्य्यवित्यमरः नौवयोधर्मेत्यादिनायत्प्रत्ययः सुप्रतराःसुखेनतार्य्याश्चकारविपिनान्यरणानि

अट्टव्यवस्थं विपिनमित्यमरः प्रकाशानि निर्द्धृतानि चकार तस्यागम्यं किमपि नास्तीति भावः ३१ स इति महतीं सेनां पूर्वसाग
रगामिनीं कर्षन् स रघुः हरस्य जटाभ्यो भ्रष्टां गंगां कर्षन् अत एव पूर्वसागरगामिनीं भगीरथ इव बभौ भगीरथो नाम कश्चि
त् राजा कपिलदग्धानां सागराणां न प्राणत्यावनाय हरकिरीटात् गंगां प्रवर्त्तयिता राजा यत्संबंधात् गंगा च भागीरथीति
र॰वं॰ गीयते ३२ त्याजितैरिति फललाभं ह्रस्वपदे प्रसवं च त्याजितैः त्याजिनः अपितान् [illegible] कर्मणि [illegible] उत्खा
टी॰ ८१ तैः स्वपदात् च्यावितैः अन्यत्र उत्पाटितैः बहुधा भग्नैः [illegible] अन्यत्र छिन्नैः नृपैः पादपैः दंतिनो गजस्य एव तस्य रघोः मा
41 र्ग उल्बणः प्रकाश आसीत् प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुटमिति यादवः ३३ पौरस्त्यानिति जयी जयनशी

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः ३१ स सेनां महतीं क
र्षन् पूर्वसागरगामिनीम् बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३२ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृ
पैः तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः ३३ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी प्राप ता
लीवनश्याममुपकंठं महोदधेः ३४ अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमा

लः जिदृक्षिविश्र्यादिनेत्यादिना इनिप्रत्ययः स रघुः एवं पुरोभवान् पौरस्त्यान् प्राच्यान् दक्षिणापश्चात्पुरसस्त्यगिति त्यक्
प्रत्ययः तांस्तान् अखिलान् सर्वानित्यर्थः वीप्सायां द्विरुक्तिः जनपदान् देशान् आक्रमन् तालीवनैः श्यामं महोदधेः उप
कंठं अंतिकं प्राप ३४ अनम्राणामिति अनम्राणां कर्मणि षष्ठी समुद्धर्तुरुन्मूलयितुः तस्मात् रघोः सकाशा
त् भीत्रार्थानां भयहेतुरित्यपादानत्वात् पंचमी सिंधुरयात् नदीवेगादिव सुह्मैः सुह्मदेशोद्भवैः सुह्मादयः शब्दाः जनपदवचनात्
क्षत्रियमाचक्षते वैतसीं वेतसः संबंधिनीं वृत्तिं प्रणतिमित्यर्थः आश्रित्य आत्मा संरक्षितः अत्र कौटिल्यः बलीयसाभि
युक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्ममातिष्ठेदिति ३५ वंगानिति नेता नायकः स रघुः नौभिः साधनैः उद्धतान् ८२
त्वंगान् वंगान् तरसा बलेन तरसी बलं रंहः सीतियादवः उत्खायोन्मूल्य गंगायाः स्रोतसां प्रवाहाणां अंतरेषु ज

नस्थापितवानित्यर्थः ३६ आपादेति आपादपद्मं अंघ्रिपद्मपर्य्यंतं प्रणताः अतएवोत्खाताः पूर्वमुद्धृताः अपि प्रतिरोपिताः।
पश्चात्स्थापिताः ते वंगाः कलमा इव शालिविशेषा इव शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंसीत्यमरः तेषां पादपद्मं
मूलपद्मपर्य्यंतं पादेंघ्रिरश्मितुर्यांशेषोलमत्यंतपर्वतः बुध्नेत्वरीयांश इति विश्वः उत्खातप्रतिरोपिताश्च रघुं फलैरर्थनैः
अन्यत्र सस्यैः संवर्द्धयामासुः फलं फले धने बीजे निष्पत्तौ भोगलाभयोः सस्य इति केशवः ३७ स इति स रघुर्बद्धा द्विर
दा एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीं करभामिति केचित्पठंति तीर्त्वा उत्कलैः राजभिः दर्शितपथः संदर्शित।
मार्गः सन् कलिंगाभिमुखो ययौ ३८ स इति स रघुर्महेन्द्रस्य कुलपर्वतविशेषस्य महेन्द्रो मलयः सह्यः शक्तिमा

वंगानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तंभान् गंगास्रोतोन्तरेषु सः ३६ आपादपद्मप्रण
ताः कलमा इव ते रघुम् फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ३७ स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतु
भिः उत्कलादर्शितपथः कलिंगाभिमुखो ययौ ३८ स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् अंकुशं द्वि रं
रदस्येव यंता गंभीरवेदिनः ३९ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः १८

नृक्षवत्पर्वतः विंध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः इति विष्णुपुराणात् मूर्ध्नि तीक्ष्णं दुःसहं प्रतापं यंता सारथिर्गं
भीरवेदिनो द्विरदस्य गजविशेषस्य मूर्ध्नि तीक्ष्णं निशितमंकुशमिव न्यवेशयत् निर्हिमवान् त्वग्भेदाच्छोणितस्रा
वान्मांसस्य क्रथनादपि आत्मानं यो न जानाति स स्याद्गंभीरवेदिनेति राजपुत्रीये चिरकालेन यो वेत्ति शिक्षां परचि
तामपि गंभीरवेदि विज्ञेयः स गजो गजवेदिभिः इति मृगचर्म्मीये ३९ प्रतीति गजसाधनः सन् कालिंगः कलिंगानां
राजा द्व्यजमगधकलिंगेत्यादिना अण्प्रत्ययः अस्त्रैरायुधैः तं रघुं पक्षाणां छेदेनोद्यतं उद्युक्तं शक्रं शिलावर्षी पर्वतः इ
व प्रतिजग्राह अभियुक्तवान् ४० द्विषामिति काकुत्स्थो रघुः तत्र महेन्द्राद्रौ द्विषां नाराचदुर्दिने नाराचानां बाणविशेषाणां दि

स्नान इव विजयमंगलार्थमभिषिक्त इव जयश्रियं प्रतिपेदे प्रापयन्न सर्वौषधिस्नाने तन्मांगल्यमरोचकमिति यादवः ४१ तां
ह्लीनामिति तत्र महेन्द्रोपकण्ठे तस्मिन्निति योधाः पचायच्च रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशाः यैस्ते तथोक्ताः।
मेतः नारिकेलासवं नारिकेलमद्यं तांबूलिमद्यं तांबूलीनां नागवल्लीनां दलैः पपुः तत्र विजह्रुरित्यर्थः शात्रवं यशश्च प
र॰ वं॰ पुः जह्रुरित्यर्थः वकारं दन्त्योष्ठ्यपाठे वशब्द इवार्थे शात्रवं यश इवेत्यर्थः ४२ गृहीतेति धर्मविजयी धर्मार्थं विजयशी
टी॰ ४२ लः स नृपो रघुः गृहीतश्चासौ प्रतिमुक्तश्च तस्य महेन्द्रनाथस्य कालिंगस्य श्रियं जहार धर्मार्थमिति भावः मेदिनीं तु न ज

42

प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ४० द्विषां विषह्य काकुत्स्थ
स्तत्र नाराचदुर्दिनम् सन्मंगलस्नात इव प्रतिपेदे जयश्रियम् ४१ तांबूलीनां दलैस्तत्र रचितापानभूमयः
नालिकेरासवं योधाः शात्रवं च पपुर्यशः ४२ गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः श्रियं महेन्द्रनाथ
स्य जहार न तु मेदिनीम् ४३ ततो वेलातटेनैव फलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यज
यो ययौ ४४ स सैन्यपरिभोगेन गजदानसुगंधिना कावेरीं सरितां पत्युः शंकनीयामिवाकरोत् ४५

हार शरणागतवत्सलत्वादिति भावः ४३ तत इति प्राचीविजयानंतरं फलवत्पूगमालिना फलितक्रमुकश्रेणीमा।
ता अश्वाद्यादित्वादिति प्रत्ययः वेलायाः समुद्रकूलस्य तटेनोपान्त्येनैव अगस्त्येनाचरितामाशां दक्षिणां दिशं अना।
शास्यजयः अयत्नसिद्धत्वात् अप्रार्थनीयजयः सन् ययौ अगस्त्यो दक्षिणामाशामाश्रित्य नभसि स्थितः वरु
णस्यात्मनो योगी विंध्यवातापिमर्दन इति ब्रह्मपुराणे ४४ स इति स रघुः गजानां दानेन मदेन सुगंधिना सुरभिगं
धिना गंधस्येत्त्वादिना इकारः समासांतः यद्यपि गंधस्येत्वे तदेकांतग्रहणं कर्तव्यमिति नैसर्गिकगंधविवक्षाया
मेवेकारादेशस्तथापि निरंकुशाः कवयः तथा माघकाव्ये वधूरसुकच्छदगुच्छसुगंधयः सततगास्ततगास्तत ४२
गा नगिरो लिभिभिः नैषधे च अयं हिनस्ति मायनवारिधारास्वादुः सुगंधिः स्वदनेन धारा इति न कर्म॥

४ प्राजानेयखुरक्षुण्णं पक्वैलादेत्रसंभवम् व्यानशेसपदिव्योमकीटकोशाविलंरजः॥ ४७

यारयान्मत्वर्थीयनिषेधादिनिप्रत्ययपक्षेऽपिजवृत्यएवसेनायांसमवेतायेसैन्यास्तेसैनिकाश्चतइत्यमरः सेनायांचेति
ण्यप्रत्ययः सैन्यानांपरिभोगेनउभयोगेनकावेरींनामसरितंसरितांपत्युः समुद्रस्यशंकनीयामविश्वासनीयामिवाक
रोत् संभोगस्य लिंगदर्शनात्तद्भर्तुरविश्वासोभवतीतिभावः ४५ बलैरिति विजिगीषोर्विजेतुमिच्छोः गताध्वनस्तस्यरघोः
बलैः सैन्यैः बलंशक्तिर्बलं सैन्यमितियादवः मारीचेषुमरिचवनेषुउद्भ्रान्ताः परिभ्रान्ताः हारीताः पक्षिविशेषाः यासुताः
रघु तेषांविशेषाद्धारीतोमद्गुकारंडवप्लवाइत्यमरः मलयाद्रेरुपत्यकाः आसन्नभूमयः उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधि
त्यकाइत्यमरः उपाधिभ्यांत्यकन्नासन्नारूढयोरितित्यकन्प्रत्ययः अध्युषिताः उपत्यकाद्रेरासन्नाभूमिरध्युषितेत्यर्थः
उपादध्यावस इतिकर्मणिक्तः ४६ ससंजुरितिअश्वैः क्षुण्णानामेलानां[illegible]त्पतिष्णवः उत्पतनशीलाः अलंकृञित्या
बलैरध्युषितास्तस्यविजिगीषोर्गताध्वनः मारीचोद्भ्रान्तहारीतामलयाद्रेरुपत्यकाः ४६ ससंजुरश्वक्षुण्णा
नामेलानामुत्पतिष्णवः तुल्यगंधिषुमत्तेभकटेषुफलरेणवः ४७ भोगिवेष्टनमार्गेषुचंदनानांसमर्पितम्
नास्रसत्करिणांग्रैवेयंत्रिपदीछेदिनामपि ४८ दिशिमन्दायतेतेजोदक्षिणस्यांरवेरपि तस्यामेवरघोः पांड्याः
१३ दिनाइष्णुच्प्रत्ययः फलरेणवः फलरजांसितुल्यगंधिषुसमानगंधिषुसर्वंपतीतिवदिनेतोवहुव्रीहिः मत्तेभानांक
टेषुगंडेषुससंजुः सक्ताः गजगंडेकटोकटाविमत्यमरः ४७ भोगीति चंदनानांचंदनद्रुमाणांभोगिवेष्टनमार्गेषुस
र्पवेष्टनानांनिम्नेषुसमर्पितंसज्जितंत्रिपदीछेदिनांपादशृंखलछेदकानामपित्रिपदीपादबंधनमितियादवः क
रिणांग्रीवासुभवंकंठबंधनंग्रैवेयंग्रीवाभ्योणचेत्यणप्रत्ययः नास्रंसत न स्खलितमभूत् द्युद्भ्योलुङीति परस्मैपदंद्युता
द्युदितान्स्वदितः परस्मैपदेष्वित्यङ् अनिदितांहलउपधायाः क्ङितीतिनकारलोपः ४८ दिशीति दक्षिणस्यांदिशिरवे
रपितेजोमंदायते मंदीभवति लोहितादिडाज्भ्यः क्यषितिक्यष्प्रत्ययः वाक्यषइत्यात्मनेपदं दक्षिणायनेतेजोमांद्या
दितिभावः तस्यामेवदिशिपांड्याः पांडुनाम्नोजनपदानांराजानः पांड्याः पांड्वाड्यणवक्तव्यः रघोः प्रतापंनविषेहिरे नसे

तेपांड्याः ताम्रपर्णीनद्यासमेतस्य संगतस्य महोदधेः संबंधि संचितं मुक्तासारं मौक्तिकं वरं सारो बले स्थिरांशे वन्याय्येल्लीवेव
रेविश्वितमरः स्वस्वकीयं संचितं यशः इव तस्मै रघवे निपत्य प्रणिपत्य ददुः यशसः शुभ्रत्वादौपम्यं ताम्रपर्णीसंगमे मौक्तिको
त्पत्तिरिति प्रसिद्धम् ५० सइति असह्यो नियुग्ममेतत् असह्यविक्रमः सरघुः तटेषु सानुष्वालीनचंदनौ व्याप्तचंदनद्रुमौ स्त
र॰वं॰ नपक्षे अंतेषु व्याप्तचंदनानुलेपौ तस्याः दक्षिणस्या दिशः स्तनाविव स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथेष्टं नि
टी॰४३ विश्योपभुज्यनिर्वेशो भृतिभोगयोरित्यमरः उदकान्यस्य संतीत्युदन्वान् उदधिः उदन्वानुदधौ चेति निपातः उदन्वता दूरा
43 न्मुक्तं दूरतस्त्यक्तं स्रस्तांशुकं स्रस्तं अंशुकं वस्त्रं यस्य तस्मिन्निति समासः पंचम्याः स्तोकादिभ्यः इत्यलुक् स्रस्तांशुकं गलितवस्त्रं
मेदिन्याः नितंबमिव स्थितं तं सह्यं सह्याद्रिं अलंघयत् आसत्यागः अतिक्रांतो वा ५२ सप्रति प्राचीं दिशं अभियया वित्याह तस्य

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ५० सनिर्विश्य यथाका-
मं तटेष्वालीनचन्दनौ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ५१ असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता नि
तंबमिव मेदिन्याः स्रस्तांशुकमलंघयत् ५२ तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सा
रितोप्यासीत्सह्यलग्न इवार्णवः ५३ भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् अलकेषु चमूरेणुश्चूर्णप्र

ति अपरांतानां पाश्चात्यानां जये उद्यतैः उद्युक्तैः अपरांतास्तु पाश्चात्यास्ते च पारसिकादयः इति यादवः विसर्पद्भिः गच्छ
द्भिः तस्य रघोरनीकैः सैन्यैः अनीकं तु रणे सैन्य इति यादवः अर्णवो रामस्य जामदग्न्यस्यास्त्रैरुत्सारितो पनिसारि
तोपि सह्यलग्न इवासीत् सैन्यं द्वितीयोर्णव इव दृश्यत इति भावः ५३ भयेति तेन रघुणा भयोत्सृष्टविभूषाणां परि
हृतविभूषणानां केरलयोषितामलकेषु चमूरेणुः सेनारजः चूर्णस्य कुंकुमादिरजसः प्रतिनिधीकृतः प
तनयोषितां पलायने चमूनां तदनुधावने च स्थलन्पतेत ५४ मुरलेति मुरलानाम केरलदेशेषु काचिन्नदी मुरवी ४३
तिकेचित्पठंति तस्यामारुतेनोद्भूतमुत्थापितं केतकं केतकीसंबंधि रजः तयोधवारणानां रघुभट ॥ श्रीरामजी

कंचुकोस्त्रीवारवाणोरत्यमरः

कंचुकानां कंचुकोवारवाणोस्त्रीत्यमरः अयत्नपटवासतां अयत्नसिद्धवस्त्रवासितत्वमगमत् पिष्टातः पटवासकः
इत्यमरः ५५ अभ्यभूयतेति चरतां गच्छतां वाजिनां वाहानां वाजिवाहार्वगंधर्वहयसैन्धवसप्तयः इत्यमरः गात्रसिंजितैः
गात्रेषु शब्दायमानैः कर्त्तरिक्तः संजितैरिति वा पाठः संजनैरर्पितानां कर्मणिक्तः वर्मभिः कवचैः पवनेनोद्धूतानां कंपिता
नां राजतालीवनानां यो ध्वनिरभ्यभूयत रागराजविपिनानां नगराजाङ्कृयतालाल इत्यमरः सतिरस्कृतः ५६ खर्जूरीति
खर्जूरीणां तरुणां द्रुमविशेषाणां खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमा इत्यमरः स्कंधेषु प्रकोष्ठेषु अस्त्री प्र
कांडः स्कंधः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः नद्धानां बद्धानां करीणां मदोद्गारैः मदस्रावैः सगंधिषु गंध
स्येत्यादिना इकारः कटेषु गंडेषु पुन्नागेभ्यः नागेभ्यः नागकेसरेभ्यः पुन्नागपुष्पाणि विहाय ल्यब्लोपे पंचमी शिली

मरुत्लामारुतोद्धूतमगमत्केतकं रजः तद्योधवारवाणानामयत्नपटवासताम् ५५ अभ्यभूयत वाहानां
चरतां गात्रसिंजितैः वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ५६ खर्जूरीस्कंधनद्धानां मदोद्गारसु
गंधिषु कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ५७ अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ
अपरांतमहीपालव्याजेन रघवे करम् ५८ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् त्रिकूटमेव तत्रोच्चैर्जयस्तंभं

[illegible]

मुखाः अलयः पेतुः अलिबाणौ शिलीमुखावित्यमरः ततोपि सौगंध्यातिशय इति भावः ५७ अवकाशमिति उद
न्वान् उदधिः रामाय जामदग्न्याय अभ्यर्थितो याचितः सन् अवकाशं स्थानं ददौ रघवे तु अपरांतमहीपालव्याजेन करं
बलिं ददौ बलिहस्तांशवः करा इत्यमरः अपरांतानां समुद्रमध्यदेशस्थत्वात्तैः करेण समुद्रदत्तोपचारः करदानेन च भी
त्यानतया जामदग्न्ययेति रामादपि रघोरुत्कर्षः ५८ मत्तेति तत्र रघुर्मत्तानामिभानां रदनोत्कीर्णानि दंतक्षतान्येव भावे क्तः
व्यक्तमिव स्फुटानि विक्रमलक्षणानि पराक्रमचिह्नानि विजयवर्णावलिः यस्य तानि यस्मिन् तत्त्रिकूटाख्यं त्रिकूटमे
वोच्चैर्जयस्तंभं चकार गाढप्रकाशत्रिकूटोद्रिर्गजोत्कीर्णस्तंभः स्वरघोर्जयस्यापि को भूदित्यर्थः ५९ राम

र॰वं॰ टी ५५ 55

पारसीकानिति ततः सरघुः संख्यायोग तत्त्वज्ञानेनेन्द्रियाख्यानिन्द्रियनामकान् रिपूनिव पारसीकान् राज्ञो जेतुं स्थलवर्त्म
ना प्रतस्थे न तु नेदिष्टेनापि जलपथेन समुद्रयानस्य निषिद्धत्वादिति भावः ६० यवनीति सरघुर्यवनीनां यवनस्त्रीणां ज्ञा
नेन स्त्रीविषयाद्योपधादिति ङीष् मुखान्येव पद्मानि मुखपद्मानि उपमितसमासः तेषां मधुनामदेन योमदो मदरागः
कार्यकारणयोरभेदेन निर्देशः तेन न सेहे क्षमितवान् अकाले प्रावृड्व्यतिरिक्तकाले जलदोदयः प्रायेण प्राप्तविषपद्म
विकाशस्य प्रसक्तत्वादब्जानां संबन्धिनो बालातपमिव अब्जनिहितत्वादब्जसंबन्धित्वे सोरातपस्य ६१ संग्रामेति तस्य रघो
रश्वसाधनैः पश्चाद्भवैः पाश्चात्यैर्यवनैः सह हृदद्विरणाय पश्चान्नुरसल्पक् सहार्थन्तु नीयामं गाराणां विकारैः शार्ङ्गीणाय

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना । इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ६० यवनीमुखपद्मा
नां सेहे मधुमदं न सः । बालातपमिवाब्जानामकालजलदोदयः ६१ संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्व
साधनैः । शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ६२ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्मही
म् । तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ६३ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः । प्रणिपातप्रती

तेषितेषां कूजितैः शार्ङ्गैः स्वयं वा शार्ङ्गैः शृङ्गसंबन्धिभिः कूजितैः विज्ञेया अनुमेयाः प्रतियोधाः प्रतिभटाः यस्मिन् तस्मि।
न् रजसि रेणौ सति तुमुलं संग्रामसंकुलं युद्धमभूत् तुमुलं रणसंकुलमिति विश्वः भल्लेति सरघुर्भल्लापवर्जितैर्वा
णविशेषकृत्तैः स्नुहीदलफलो भल्ल इति यादवः श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः लोमादिभ्यश्चेति लच् प्रत्ययः तेषां पा
श्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः सरघा मधुमक्षिकेत्यमरः क्षुद्राः सरघास्तद्राव्यं गानटीवेशणास
रवा केटकादिकेत्यमरः शाश्वतो क्षुद्राभिः कृतानि क्षौद्राणि मधूनि क्षौद्रं मधुनि पानीइत्यमरः क्षुद्राभ्रमरवटरयारस्ज
इति संज्ञायामज् प्रत्ययः तेषां पटलैरिव वृन्दैरिव महीं तस्तार आच्छादयामास ६३ अपनीतेति शेषाः हतशिष्टाः अपनी
तशिरस्त्राणाः अपसारितशीर्षत्राणाः सन्तः शरणागतलक्षणमेतत् तं रघुं शरणं ययुः तथाहि महात्मनां संरम्भः संक्षोभः

५५

विनयंत इति तस्य रघोर्योधाः भटाः आस्तीर्णान्यजिनरत्नानि चर्माणि श्रेष्ठानि यासु तासु द्राक्षावलयानां भूमिषु मृद्वीका गोस्तनी द्रा
क्षा स्वाद्वी मधुरसेत्यमरः मधुभिर्द्राक्षाफलप्रकृतिकमद्यैः विजयश्रमं युद्धखेदं विनयंते स्म अपनीतवंतः कर्त्रभिप्राये चाशरी
रे कर्मकरणीत्यात्मनेपदं लट् स्म इति भूतार्थे लट् तत इति ततो रघुः भास्वानिव उस्रैरिव शरैः उस्रैः किरणैरिव किरणोस्रमा
यूखांशु[illegible]गभस्तिघृणिरश्मयः इत्यमरः उदीच्यानुदग्भवान् नृपान् उदकानिव उद्धरिष्यन् कौबेरीं कुबेरसंबंधिनीं दिशमुदी
चीं प्रतस्थे अनेकेनैव शब्देनेयमुपमा तथाह दंडी एकानेकशब्दत्वात्सा वाक्यार्थोपमा द्विधा इति ६६ विनीतेति सिंधुर्ना
म नदी काश्मीरदेशे प्रसिद्धः कश्चिन्नदविशेषः देवे नदविशेषेऽस्मिन् सिंधुर्नाम सरित्स्त्रियामित्यमरः सिंधोस्तीरे विचेष्टनैरंग
परिवर्तनैर्विनीताध्वश्रमाः तस्य रघोर्वाजिनोऽश्वाः लग्नाः कुंकुमकेसराः कुंकुमकुसुमकिंजल्का येषां तान् यद्वा लग्न

विनयंते स्म तद्योधा मधुभिर्विजयश्रमम् आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ६५ ततः प्रतस्थे कौबे
रीं भास्वानिव रघुर्दिशम् शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ६६ विनीताध्वश्रमास्तस्य सिंधुतीरविचेष्ट
नैः दुधुवुर्वाजिनः स्कंधांल्लग्नकुंकुमकेसरान् ६७ तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् कपोलपाटला

कुसुमाः केसराः सटा येषां तान् अथ कुंकुमं काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने रक्तसंकोचपिशुनं धीरं लोहितचंद
नमित्यमरः सटा जटा केसरयोरिति हेमः केसरो नागकुसुमे वरंगसिंहयोः स्कंधकेशेषु वकुले पुन्नागवृक्षे किंज
ल्के स्यादिति हेमः स्कंधान् कायान् कायो देहः क्लीबपुंसोरित्यमरः स्कंधः प्रकांडे काये स्यात्स्कंधो विज्ञानादिषु पंचसु नृपेस
मरे व्यूहे चेति हेमः स्कंधान् दुधुवुः धूनयंति स्म ६७ तत्रेदीच्यां दिशि भर्तृषु व्यक्तविक्रमं भर्तृवधेन स्फुटपराक्रममित्यर्थः
रघुचेष्टितं रघुव्यापारः हूणाः जनपदाः क्षत्रियाः तेषामवरोधाः अंतःपुरस्त्रियः तासां कपोलेषु पाटलस्य पाटलिम्नः
ताडनादिकं ताडनरूपस्यादेशि उपदेशकं बभूव अथवा पाटलादेशी आदेशो यस्य तत् भवस्यं केलेप्यतत् इत्यर्थः ६८
कांबोजा इति कांबोजाः राजानः समरे तस्य रघोः वीर्यं प्रभावे वीर्यं तेजःप्रभावयोः शुक्रे शक्तौ चेति हेमः सोढुमनीश्व
राः अशक्ताः संतः गजानामालानैर्बंधनभावेल्लग्नैर्विभाषालीयते इत्यालानं तेन परिक्लिष्टैः परिश्लिष्टैः अक्षोटैः इत्यपि

तेषामिति तेषां काम्बोजानां सदश्वैः भूयिष्ठा बहुलास्तुङ्गाः द्रविणानां हिरण्यानां द्रविणं पद्म विरां द्रविणमित्यमरः राशय
एवोपदाः उपायनानि उपायनमुपाग्राह्यमुपहारस्तथोपदेत्यमरः कोसलेश्वरं तेन रघुना स्वदर्प मुक्त्वा विमुक्तमदं मन्युः
पुनः शब्दः भीत्या मत्सरहेतुः अश्वत्यमरः तथापि उत्सेकगर्वो ग्लानिविशिष्टः कारणेन जगुर्वेत्यर्थः ७० तत इति ततो
र॰ वं॰ उत्तरः मसृमायनः सन् गौर्या गुरुं पितरं शैलं हिमवन्तं उत्तुङ्गैरश्वखुरोद्धुतैः धातूनां गैरिकादीनां रेणुभिः स्पृष्टकूटा
टी ४५ स्तत्स्पृष्टश्रृङ्गाणि कूटोऽस्त्री शिखरं श्रृङ्गमित्यमरः वर्द्धयन्निवारुरोह उत्पतद्भिर्लिदर्शनात् शिशिरवर्द्धमाना जायते इति
45 भावः ७१ शशंसेति तुल्यसत्त्वानां सैन्यैः समानबलानां गुहाशयानां सिंहानां अधिकरणे शेते शेतेत्यच्प्रत्ययः तेषां
सिंहानां संवेष्टिपरिवृत्त्या परावृत्त्यावलोकितशब्दियित्वा ग्रीवाभङ्गेनावलोकनेन कर्त्रा सैन्यघोषे सेनाकलकले संभ्र
मकारणे सत्यपि असंभ्रमं भयाभावं तोभविरहं नञः असत्त्वप्रतिषेधेपि समासः इष्यते शशंस कथयामास सैन्येभ्य इ॥

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ६९ तेषां सदश्व [illegible]
भूयिष्ठास्तुङ्गा द्रविणराशयः विविधुस्तविशांनाथमदं त्वक्तमिवापगाः ततो गौरीगुरुं शैलमारुरोहा [illegible]
श्वसाधनः वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७१ शशंस तुल्यसत्त्वानां सैन्यघोषेप्यसंभ्रमम् गु [illegible]
हाशयानां सिंहानां परिवृत्त्यावलोकितम् ७२ भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गङ्गाशीकरि [illegible]

त्यर्थाल्लभ्यते बाह्यचेष्टितमेव मनोहृद्वेनुमापकमिति भावः असंभ्रान्तत्वे हेतुः तुल्यसत्त्वानामिति न हि समबलः समब
लाद्बिभेतीति भावः ७२ भूर्जेष्विति भूर्जेषु भूर्जपत्रेषु भूर्जपत्रो भुजो भूर्जो मृदुत्वक् चर्मिकामनेति यादवः
मर्मरः शुष्कपर्णध्वनिर्मर्मरः शुष्कपर्णानामिति यादवः अयं चशुक्लादिशब्दवद्गुणिनि वर्त्तते प्रयोज्यते च मर्मरैरग्रु
रुधूपगन्धिभिरिति अतो मर्मरीभूताः मर्मरशब्दवन्तो भूता इत्यर्थः कीचकानां च वेणुविशेषाणां ध्वनिहेतवः ४५
छिद्रसंचारेण ध्वनिकारिणः इति भावः गङ्गाशीकरिणः शीतलाः इत्यर्थः मरुतो वाताः मार्गे तमसिषेविरे ७३ विशश्रमुरिति
सैनिकाः सेनायां समवेताः प्राग्वद्वतीयष्ठक्प्रत्ययः ॥

नमेरूणां सुरपुन्नागानां छायास्वनिषण्णानां दृषदुपविष्टानां मृगाणां कस्तूरीमृगाणां नाभिभिर्वासितोत्सङ्गाः सुरभितत्तलाः
दृषदः शिलाः अध्यास्याधिष्ठाय विशश्रमुः विश्रान्ताः ७४ सरलेति सरलेषु देवदारुविशेषेषु आसक्तानि यानि मातङ्गा-
नां गजानां ग्रीवासु भवं ग्रैवेयानि कण्ठशृङ्खलानि ग्रीवाभ्योऽण् चेति चकाराड्ढञ् प्रत्ययः तेषु स्फुरितत्विषः प्रतिफलिता-
भासः ओषधयः नक्तं ज्वलन्तो लताविशेषाः नेतुर्नायकस्य रघोर् अस्नेहदीपिकास्तैलनिरपेक्षाः प्रदीपा आसन् ७५
तस्येति तस्य रघोरुत्सृष्टेषु उज्झितेषु निवासेषु सेनानिवेशेषु कण्ठरज्जुभिः गजग्रैवैः क्षताः निघृष्टाः त्वचो येषां
ते देवदारवः किरातेभ्यो वनचरेभ्यो गजानां वर्ष्म देहप्रमाणं वर्ष्म देहप्रमाणयोरित्यमरः वर्ष्म देहप्रमाणाग्निसंद

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ७४ सरलासक्तमा-
तङ्गग्रैवेयस्फुरितत्विषः आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ७५ तस्योत्सृष्टनिवासेषु कण्ठरज्जु-
क्षतत्वचः गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ७६ तत्र युद्धं रघोर्घोरं पार्वतीयैर्गणैरभूत् नाराचक्षेप-
णीयाश्मनिष्पेषोत्पतितानलम् ७७ शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गाप- ७८

राहृतिषु स्यन्तः इति मेदिनीकारः शशंसुः कथितवन्तः देवदारुस्कन्धगतत्वक्क्षतैर्गजानामौन्नत्यमनुमीयत इत्यर्थः
७६ तत्रेति तत्र हिमाद्रौ रघोः पर्वते भवैः पार्वतीयैः पर्वताच्च इति छः गणैरुत्सवसंकेताख्यैः सह गणान् उत्सव-
संकेतान्यत्र यत्र सम्पात इति महाभारते नाराचानां बाणविशेषाणां क्षेपणीयानां भिन्दिपालानामश्मनां च निष्पेषे-
णाऽन्योन्यसंघर्षेणोत्पतितानलो यस्मिंस्तत् क्षेपणी तु भिन्दिपालः स्यादोदीर्घो महाफल इति यादवः घोरं भीमं युद्ध-
मभूत् युद्धमायोधनं जन्यमित्यमरः ७७ शरैरिति स रघुः शरैर्बाणैरुत्सवसंकेतान् नाम गणान् विरतोत्सवान् कृ-
त्वा जितेत्यर्थः किन्नरान् बाह्वोः स्वभुजयोः जयोदाहरणं जयख्यापकं प्रबन्धविशेषं गापयामास गतिबुद्धीत्यादिना कि-

परस्परेरणोति तेषु गणेषु हृष्यायन यु क्ताः प्राणयोयेषां तेषु सत्सु परस्परेरणाल्पोलंपरा ज्ञाहिमवतः सारो धनरूपो विज्ञातः हि
माद्रिणा राज्ञः सारो बलरूपो विज्ञातः एतेन तत्र त्यवस्तूनां अनर्घ्यत्वं गणानामभ्मतः सर्वे पराजयोध्वन्यते ७९ तत्रेति स
रघुस्तत्र हिमाद्रौ अहेलोभ्यमयशोयशोराशिं निवेश्यनिधाय पोलस्त्येन रावरोन तत्लितस्य चालितस्याद्रेः कैलासस्या
र·वं· टी ४६ ह्रियमाद धानो ज्जनयन्निवावरुरोह अतंतार कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः नहि स्वराः परेण पराजितेअभियुं।
जंत इतिभावः ८० चक्रंपेत इति तस्मिन्वेद्योती रीणलोहित्यानाम नदीयेन त्ती र्गलोहित्येसति प्राग्ज्योति षोज्जनपदा
46 नामीश्वरं तस्य रघोः गज्जानामालानतां प्राप्तैः कालागुरुद्रुमैः कृस्णागुरुवृक्षैः सह चकं पेकं पितवान् ८१ नेति सप्ता
परस्परेणा विज्ञातस्तेष्वायन वाणिषु राज्ञाहिमवतः सारो राज्ञः सारो हिमाद्रिणा ७९ तत्राहेलाभ्यंयशोराशिं
निवेश्यावरुरोहसः पोलस्त्यतुलितस्याद्रेराद धानइवह्रियम् ८० चकंपेतीर्णलोहित्येतस्मिन्प्राग्ज्यो
तिषेश्वरः तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ८१ नप्रसेहे सरुद्धार्कमधारावर्षदुर्दिनम् रथ
वर्त्मरजोप्यस्यकुत एव पताकिनीम् ८२ तमीशः कामरूपाणामत्याखंडलविक्रमम् भेजेभिन्नकटैर्ना
१५ गैरन्यानुपरोधयैः ८३ कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् रत्नपुष्पोपहारेण छायामानर्चपादयोः ८४
ग्ज्योतिषेश्वरः रुद्धार्कमावृतसूर्यं अधारावर्षंच दुर्दिनं चयाराहृष्टिं विनादुर्दिनीभूतं अस्य रघोः रथवर्त्मरजोपि नप्र सेहे
सेहे न कुतोपीत्यर्थः ८२ तमिति कामरूपाणां नामदेशानामीशः अत्याखंडलविक्रमं अतीन्द्रपराक्रमं तेरे रघुं भिन्नाः
स्रवन्मदाः कटाः गंडायेषांतैः नागैर्गजैः साधनैः भेजे नागान्दत्वाशरणं गत इत्यर्थः कीदृशैर्नागैः येअन्यान्नृपान्व्यति
रिक्तान्नृपान्नुपरोधय स्वरारणामपि स्पृशेरघुरितिभावः ८३ कामरूपेति कामरूपेश्वरो हेमपीठस्याधिदेवतां तस्य
रघोः पादयोश्छायांकनकमयपादपीठव्यापिनीं कांतिं रत्नान्येव पुष्पाणि तेषामुपहारेण समर्पणेनानर्चयाः
मास ८४ ५६

इतीति जिष्णुर्जयनशीलः ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः स रघुः इत्थं दिशो जित्वा रथैरुद्धतं रजः छत्रशून्येषु रघोरेकछत्रकत्वादिति भावः रा
ज्ञां मौलिषु किरीटेषु धम्मिल्लेषु वा मौलिः किरीटे धम्मिल्ले चूडाकंकेलिमूर्द्धजे इति हैमः अथ मुकुटं किरीटं पुन्नपुंसकमित्यमरः धम्मिल्लाः
संयताः कचा इत्यमरः विश्रामयन् संज्ञामयन्नित्यर्थः विश्रामयन् संक्रामयन् न्यवर्त्तत निवृत्तः ८५ स इति स रघुः सर्वस्वं धनं स्वं निजे धने इ
ति हैमः दक्षिणा यस्य तद्दानं यस्य तं सर्वस्वदक्षिणं दक्षिणा दिक्कालतिहायतद्दानमिति हैमः विश्वजित् सर्वस्वदक्षिण इति श्रुतेः विश्वजितं ना
म यज्ञं आजह्रे कृतवानित्यर्थः युक्तं चैतत् हि यस्मात् सतां साधूनां वारिमुचां मेघानामिव आदानमर्जनं विसर्गाय त्यागाय हि पात्रे विनियोगाये
त्यर्थः ८६ सत्रान्त इति काकुत्स्थो रघुः सत्रान्ते यज्ञान्ते सत्रमाछादने यज्ञे सदा दानेऽपि चेत्यमरः सचिवानां अमात्यानां सचिवो मन्त्रके मात्य इ

इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ८५ स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम्
आदानं हि विसर्गाय सतां वारिमुचामिव ८६ सत्रान्ते सचिवसखः पुरस्क्रियाभिः गुर्वीभिः शमितपराजयव्यलीकान् काकु
।।। ।। त्स्थश्चिरविरहोत्सुकावरोधान् राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ८७ ।। ।। ।।

त्यैमः सचिवा इति सचिवसखः सन् तेषामन्तं तानुसारेण चोत्तनाप्यैवासनसारिविनुष्यपदेशः रामाहः सचिवस्य सखा गुर्वीभिर्महतीभिः
पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा तच्चेषां तान् दुःखे व्यलीके वैलक्ष्ये इति यादवः चिरविरहेण उत्कण्ठिताः उत्सुकाः
अवरोधा अन्तःपुराङ्गनाः येषां तान् राज्ञोऽपत्यानि राजन्याः क्षत्रियाः तान् राजश्वशुराद्यदिति यत् ... मूर्द्धाभिषिक्तो राजन्यो बाहुजः
क्षत्रियो विराडित्यमरः स्वपुरं प्रति निवृत्तये प्रतिगमनाय अनुमेने अनुज्ञातवान् ८७ तमिति ते राजानो रथ्याङ्गध्वजाङ्कुलिशादीनि चातपत्राणि च ध्वजा
दिकानामेरवाइत्यर्थः तानि चिह्नानि यस्य तं तथोक्तं प्रसादेनानुग्रहेण लब्धं तत् इति प्रसादलभ्यं सम्राजः सार्वभौमस्य रघोश्चरणयुगलं प्रस्थाने प्रयाण
समये याः प्रणतयो नमस्काराः करस्थौ अंगुलीषु तौलिपुके प्रावंधेषु याता तेषां माल्यानि तासां च्युतैर्मकरन्दैः पुष्परसैः मकरन्दः पुष्परस इत्यमरः
रेणुभिः परागैः परागः सुमनोरज इत्यमरः गौरगौरवर्णं चक्रुः ८८ ।। ।।

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां चतुर्थः सर्गः ४ इन्दीवरदलश्यामामिन्दिरानन्द
कन्दलम् वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् तमिति विश्वजिति विश्वजिन्नाम्नि अध्वरे यज्ञे यज्ञः सवोऽध्वरो यागः इत्यमरः
र. चु. टी. निःशेषं विश्राणितं दत्तं श्रण दाने चुरादिः कोशस्यार्थराशेर्जातं समूहो येन तं तथोक्तं कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः
इत्यमरः जातं जातिसमूहयोरित्युभयत्रापि शाश्वतः एतेन कौत्सस्यानवसरप्राप्तिं सूचयति क्षितीशं रघुं उपात्तविद्यो ४
४६ वरतन्तोः शिष्यः कौत्सः नाम्ना ऋषिः गुरुदक्षिणार्थी गुरुदक्षिणार्थीत्यत्र समासः प्रपेदे शरणं प्राप्तेत्यन्वयः
47 ६प अप्रस्तावे तु भावः प्रपेदे प्राप्तः अस्मिन् सर्गे वृत्तमुपजातिः तदुक्तं अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः

तेरे एवाध्वजकुलिशातपत्रचिह्नं सम्राजश्चरणयुगं प्रसाददलभ्यम् प्रस्थानप्रणतिभिरंगुलीषु चक्रुर्मौलिस्रक्च्युत
मकरन्दरेणुगौरम् ८८ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रघुदिग्विजयो नाम चतुर्थः सर्गः ४॥
तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः १ र
स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः २

तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इति लक्षणात् स इति अनर्घ्यशीलोऽप्रमेयस्वभाव इत्यर्थः मूल्ये पूजाविधा
वर्घः शीलं स्वभावे सद्वृत्ते इति वामनः यशसा प्रकाशः प्रकाशत इति प्रकाशः पचाद्यच् अतिथिषु साधुरातिथेयः अतिथि च
वसतिस्वपतेर्ढञ् तिति ढञ् स रघुर्हिरण्मयस्य विकारो हिरण्मयं दाण्डिनायनेत्यादिना निपातितः हिरण्मयत्वादभावान्मृण्मये १
पात्रे तत्र सर्वस्वदक्षिणकत्वादिति भावः मृण्मये मृद्विकारे पात्रे अर्घं पूजार्थं द्रव्यं अर्घ्यं पादार्घाभ्यां चेति यत् पूजार्थद्र
व्यं निधाय श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धं श्रूयत इति श्रुतं श्रुतेन वेदशास्त्राभ्यां श्रुतं शास्त्रावधृतयोरित्यमरः अतिथिं
अभ्यागतं कौत्सं प्रत्युज्जगामेत्यर्थः प्रत्युज्जगाम ॥ २ ५६
तःवी ४

तामिति विधिज्ञः शास्त्रज्ञोऽकरणे प्रत्यवायभीरुरित्यर्थः मानधनाग्रयायी अग्रेसरः अपयशोभीरुरित्यर्थः कृत्यवित्का
र्यज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशांपतिर्मनुजेश्वरः द्वौ विशौ वैश्यमनुजाविर्त्यमरः विष्टरभा
जमासनगतेऽपविष्टमित्यर्थः विष्टरो विष्टपी दर्भमुष्टी पीठाद्यमासनमित्यमरः वृक्षासनयोर्विष्टर इति निपातः तं त
पोधनं विधिवद्विध्यर्हं यथाशास्त्रमित्यर्थः नरर्हमिति वत्प्रत्ययः अर्चयित्वा आरात्समीपे दूरसमीपयोरित्यमरः उप्राद्दा
कृताञ्जलिः सन् वक्ष्यमाणप्रकारेणोवाच २ अप्यग्रणीरिति हे कुशाग्रबुद्धे कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पु
मानिति हलायुधः मन्त्रकृतां मन्त्रस्रष्टॄणां सुकर्मपापमन्त्रेति क्विप् ऋषीणामग्रणीः श्रेष्ठः ते तव गुरुः कुशली अपि

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदि
त्युवाच २ अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैत
न्यमिवोष्णरश्मेः ४ कायेन वाचा मनसा च शश्वद्यत्संभृतं वासवधैर्यलोपि आपाद्यते न व्ययमन्तरायैः [illegible]

हे भवान् किं अपि प्रश्ने गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः यतो यस्माद्गुरोः सकाशात्त्वया अशेषज्ञानं लो
ना ३ केन उष्णरश्मेः सूर्याच्चैतन्यं प्रबोध इव आप्तं प्राप्तं यद्वा त्वया आप्तं इत्यत्र तत्र प्रयाः प्राप्तवान् या प्रापणा इत्यस्य लिङ्
रूपं ४ कायेनेति कायेन उपवासादिना कृच्छ्रचान्द्रायणादिना वाचा वेदपाठेन मनसा गायत्रीजपादिना पिकरणेन वासव
स्येन्द्रस्य धैर्यं विलुम्पतीति वासवधैर्यविलोपि स्वपदापहारशंकाजनकमित्यर्थः यत्तपः शश्वत्संभृतं तत्त्रिविधं कुः पु
नः शश्वदभीक्ष्णमसकृत्समाः इत्यमरः संभृतं संचितं महर्षेर्वरतन्तोः त्रिविधं वाङ्मनःकायजं अन्तरायैर्विघ्नैरिन्द्रा
प्रेरितैरप्सरःशापैर्व्ययं नाशं ना आपाद्यते कच्चित् न नीयते किं कच्चित्कामप्रवेदने इत्यमरः ५ आधारेति आधारप्र
मुखैरालवालनिर्माणादिभिः प्रयत्नैरुपायैः आधारमालवालं तु वंये पिकरणापि चेति विश्वः सृतेभ्यो निर्गतो

र॰ वं॰ टी॰ ५८

48

तियादव॰४ पृ॰४

वर्धितानां श्रमच्छिदां आश्रमपादपानां वाय्वादिः आदिशब्दाद्दावानलादिरुपप्लवो बाधो न कच्चिन्नास्ति किं ६ क्रियानि
मित्तेष्विति क्रियानिमित्तेष्वपि अनुष्ठानसाधनेष्वपि कुशेषु मुनिभिः वत्सलत्वान्न गतेच्छादभग्नकामास्वप्रतिहते।
च्छा तेषां मुनीनां अंका एव शय्यास्ताभ्यो च्युतानि नाभिनालानि यस्याः सा तथोक्ता नालो नालमथास्त्रियामित्यमरः
मृगीणां प्रसूतिः संततिः अनघा अव्यसना कच्चित् अनपायिनी किमित्यर्थः दुःखैनोव्यसनेष्वघमिति ह्याल्लभया
दृशा तावमेकेऽएवधारयंति ७ निवर्त्यत इति यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादि निर्वर्त्यते निष्पाद्यते येभ्यो जले
भ्यः उद्धृत्येति शेषः पितॄणामग्निष्वात्तादीनां निवापांजलयस्तर्पणांजलयः पितृदाने निवापः स्यादित्यमरः निवर्त्यंते
उंछानां प्रकीर्णोद्धृतधान्यानां षष्ठैः षष्ठभागैः पालकत्वाद्राजग्राह्यैः अंकितानि सैकतानि पुलिनानि येषां तानि तथो

आधारबंधप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् कच्चिन्न वाय्वादिरुपप्लवो वा श्रमच्छिदामाश्रमपाद
पानाम् ६ क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु तदंकशय्याच्युतनाभिनाला कच्चि
न्मृगीणामनघा प्रसूतिः ७ निवर्त्यते यैर्नियमाभिषेको येभ्यो निवापांजलयः पितॄणाम् तान्युंछषष्ठांकित

क्तानि वो युष्माकं तानि तीर्थानि शिवानि भद्राणि कच्चिदनुपद्रवानि किमित्यर्थः उंछो धान्यांश आदानं कणिशाद्यर्ज
नं शिलमिति यादवः षष्ठाष्टमाभ्यां ञ चेति षष्ठशब्दाद्भागार्थे ञप्रत्ययः अत एवापूरणार्थत्वात्पूरणगुणेत्यादिना
षष्ठीसमासप्रतिषेधः यद्वा संज्ञाप्रमाणत्वादिति निर्देशस्य सामान्यापेक्षज्ञापकत्वात्पूरणगुणेत्यादिना निषेधो
तानि४ नित्यः सिकता येषु संति सैकतानि सिकताशर्कराभ्यां चेत्यण्प्रत्ययः ८ नीवारेति कालेषु योग्यकालेषु उपपन्ना
नामागतानामतिथीनां कल्प्याभागा यस्य तेन तथोक्तेन वनेभवेन वन्येन शरीरस्थिते जीवितस्य साधनेन वो युष्माकं पच्यन इति।
पाकः फलं धान्यमिति यावत् नीवारपाकादि आदिशब्दात् श्यामाकादिधान्यसंग्रहः जनपदेभ्य आगतैर्जानपदैः ५८
नगरादागता इत्यर्थः तत आगत इत्यण् कडंगरीयैः कडंगरं बुसं मुद्गादिकाष्ठमिति यावत् तदर्हंतीति कडंगरीयाः कडं
गरो बुसं स्त्रीवे धान्यत्वचि तुषः पुमानित्यमरः कडंगरदक्षिणाच्छ चेति छप्रत्ययः तैर्गोमहिष्यादिभिः नामृश्यते कच्चि

गदा

ग्रयीति किंच त्वं प्रसन्नेन सता महर्षिणा सम्यग्विनीय शिक्षयित्वा विद्यामुपदिश्येत्यर्थः गृहाय गृहस्थाश्रमं प्रवेष्टुं क्रियार्थोप
पदेत्यादिना चतुर्थी अनुमतोऽनुज्ञातः किं हि यस्मादयं तव सर्वेषां आश्रमाणां ब्रह्मचर्य्यवानप्रस्थयतीनामुपकारे क्षमं श
क्तं क्षमे शक्ते हिते त्रिष्वित्यमरः द्वितीयमाश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुं अयं कालो हि विद्याग्रहणानन्तर्य्यात् स्येति भावः का
लः समये वेलायाम् तन्मन् सर्वोपकारक्षममित्यत्र मनुः यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः वर्त्तन्ते गृहिणस्तद्वदाश्रित्येतर
आश्रमा इति ९ कुशलप्रश्नं विधायागमनप्रयोजनप्रश्नं चिकीर्षुरित्याह तवेति अर्हतः पूज्यस्य प्रकाशस्य अर्हः प्र
शंसायामिति शतृप्रत्ययः तवागमनेनागमनमात्रेण ममेमनो न तृप्तं न तुष्टं किं तु नियोगक्रियया आज्ञाकरणेनोत्सु

॥ भागधेयमित्यपि ॥

नीवारपाकादि कडङ्गरीयैरामृश्यते जानपदैर्न कच्चित् कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थिति
साधनं वः ९ अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय कालो ह्ययं संक्रमितुं द्वितीयं सर्वोप
कारक्षममाश्रमं ते ९ तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि संभावयितुं वनान्माम् ॥ इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य स्वार्थोपपत्तिं प्रति दुर्बला

कौत्स कं मे तत्परे प्रसितासक्तौ इष्टार्थोद्युक्त उत्सुक इत्यमरः प्रसितोत्सुकाभ्यां तृतीया चेति सप्तम्यर्थे तृतीया शासि
तुर्गुरोराज्ञया पि आत्मना स्वतो वा प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया मां संभावयितुं वनान्प्राप्तोऽसि गुर्वर्थं स्वार्थं वा
गमनमित्यर्थः ११ इतीति अर्घ्यपात्रेण मृण्मयेनानुमितो व्ययः सर्वस्वत्यागो यस्य तस्य रघोरित्युक्तप्रतिकारामुदा
रां उदारार्थामुक्तामपि गां वाचं मनो नियोगक्रिययोत्सुकं मे इत्येवंरूपां स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजलेल
क्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः निशम्य श्रुत्वा वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः
सन् मृण्मयपात्रदर्शनाच्छिथिलमनोरथः सन् तं रघुमिति वक्ष्यमाणप्रकारेणावोचत् १२ सर्वत्रेति हे राजन्
सर्वत्र नोऽस्माकं वार्त्तं स्वास्थ्यमवेहि जानीहि वार्त्तं फल्ग्वन्यरोगे चेत्यमरः वार्त्तं पाटवमारोग्यं भाव्यं स्वास्थ्यमनामयमि

क२ कथं कल्पेत

स्वैरसति प्रजानामशुभं दुःखं कुतः तथाहि अर्थान्तरन्यासमाह सूर्ये इत्यादिना सूर्ये तपति सति प्रकाशमाने सति तमिस्रा तम
स्ततिः तमिस्रं तिमिरे रोगे तमिस्रा तु तमस्ततौ कृष्णपक्षनिशायां चेति विश्वः तमिस्रमिति पाठे तमिस्रं तिमिरं तमः इत्यमरः
लोकस्य जनस्य लोकस्तु भुवने जने इत्यमरः दृष्टेरावरणाय आवरणं कर्तुं कथं कल्पेत दृष्टिमावरितुं नालमित्यर्थः कॢपे
२.३. रलमर्थत्वात् योगेन नमः स्वस्तीत्यादिना चतुर्थी अलमिति पर्याप्त्यर्थग्रहणमिति भगवान्भाष्यकारः संपद्यते नेकल्प्ये
टी४५ न त्यर्थः कॢपि संपद्यमाने च चतुर्थीति वक्तव्यात् १३ तवार्हतः इत्यादिनोक्तं यत्तत्त्वचित्रमित्याह भक्तिरिति प्रतीक्ष्येषु पू
49 ज्येषु पूज्यः प्रतीक्ष्य इत्यमरः भक्तिरनुरागविशेषः ते तव कुलोचिता कुलाभ्यस्ता अभ्यस्तस्तु चितं न्याय्यमिति यादव
वः हे महाभाग सार्वभौम तया भक्त्या पूर्वानतिशेषे अतिवर्तसे किं तु अर्थिभावाच्चेत्तर्हि कथं खेद इत्यत्र इत्युपसे
यत आह व्यतीतेति अहं व्यतीतकालोऽतिक्रान्तकालः सन् अर्थिभावाद्याचकत्वात् अभ्युपेत इति मे विषादः १४ शरीरेति

सर्वत्रैवो निर्वहामहे हि राजन्नाथे कुतस्त्वय्यशुभं प्रजानां सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमि
स्रा १३ भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति
तो४ मे विषादः १४ शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नी
वार इवावशिष्टः १५ स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति पर्यायपीतस्य सुरैर्हिमांशोः कला

हे नरेन्द्र तीर्थे सत्पात्रे प्रतिपादिता दत्ता ऋद्धिर्येन स तथोक्तः तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिष्विति विश्वः योनौ जलावता
वपत्रे५ रे च मेध्या धृष्टादशस्वपि पुराणहेत्वे चेतीर्थं स्यादृशिनेऽप्यपीति हलायुधः शरीरमात्रेण तिष्ठन् आरण्यका अरण्यभवा म
नुष्याः मुनिप्रमुखाः अरण्यान्मनुष्य इति वुञ्प्रत्ययः तैरुपात्ता फलमेव प्रसूतिर्यस्य सः स्तम्बेन काण्डेनावशिष्टः प्रकाण्डा
दित्यादिनीयानीवार इव भासि शोभसे १५ स्थान इति भवानेकनराधिपः सन् सार्वभौमः सन् मखजं क्रतुजन्यं न विद्यते
किंचनः मयूरव्यंसकादित्वात्तत्पुरुषसमासः तस्य भावः तत्त्वं निर्धनत्वं व्यनक्ति प्रकटयति स्थाने युक्तं युक्ते द्वे साम्प्रते
स्थानमित्यर्थः तथाहि सुरैर्देवैः पर्यायेणानुक्रमेण पीतस्य हिमांशोः कलाक्षयो वृद्धेरुपचयात् श्लाघ्यतरो हि वरः खलु

नंतरस्मि

द्दीरागत्वमपिशोभते त्वरेः पीतावशेषस्यकुसस्यदेवावियोगिव १६ तदिति तत्तस्मात्तावदन्यकार्य्येश्ववयावत्तावत्तुसाकलेपवर्यैर्मानाव
यावरोश्तिविघ्नः प्रयोजनमेतस्मादितोहं अन्यतोवदान्यातराह्वर्थं गुरुयनमाहृत्तेअर्जेयितेयतिष्यउद्योदेतेतत्तभ्येस्वस्ति
गुमम लत्तनमःस्वस्तीत्यादिनाचतुर्थी तथाहि चातकोपियदराणीयतितेतोयंचातकानांरुजाकरेश्तिहेतोरनन्यगतिकोपी
त्यर्थः निर्गलितःअंबेवगर्भीयस्तंशरद्घनेनाहृतिनयाचते अर्हं गतोयाचनेचेतियान्तःयाचनार्थंररोर्द्दनमितियादवः
१७ एतावदिति एतावज्ञात्वत्त्वाप्रतियातकामोयुस्यंतंप्रतियातकामं तंकाममनसोरपीतिमल्लोपःमहर्षेर्वरतंतोः
शिष्यंकोत्संतत्पतिर्निषिध्यनिवार्य्य हेविद्वन् त्वयागुरवेप्रदेयंवस्तुकिंकिमात्मकेकियत् किंपरिमाणंवा इत्येवंतो

तदन्यतस्तावदनन्यकार्य्योगुर्वर्थमाहर्तुमहंयतिष्ये स्वस्त्यस्तु तेनिर्गलितांबुगर्भशरद्घनेनार्दितिचातकोपि १७ ॥
एतावदुक्त्वाप्रतियातुकामंशिष्यंमहर्षेर्नृपतिर्निरुध्य किंवस्तुविद्वन्गुरवेप्रदेयंत्वयाकियद्वेतिजमन्वयुंक्त १८ १९
ततोयथावद्विहिताध्वराय तस्मैस्मयावेशविवर्जिताय वर्णाश्रमाणांगुरवेसवर्णीविचक्षणःप्रस्तुतमाचचक्षे १९ ष्टि
समाप्तविद्येनमयामहर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै समेचिरादस्खलितोपचारांतांभक्तिमेवागणयत्पुरस्तात् ष्टि

कौत्संअन्वयुंक्तअपृछत् प्रश्नोनुयोगःपृच्छाचेत्यमरः १८ ततइति ततोयथावद्यथार्हं अर्हार्थेवतिःविहिताध्वरायवि
धिवदनुष्ठितयज्ञायसदाचारायेत्यर्थः स्मयावेशविवर्जितायगर्वाभिनिवेशशून्यायअनहंकृतायेत्यर्थः वर्णानांब्राह्म
णादीनांआश्रमाणांब्रह्मचर्य्यादीनांचतेषांगुरवेनियामकाय वर्णाःस्युर्ब्राह्मणादयइत्यमरः ब्रह्मचारीगृहीवानप्र
स्थोभिक्षुश्चतइयेआश्रमोस्त्रीत्यमरः सर्वकार्य्यनिर्वाहकायेत्यर्थः तस्मैरघवेविचक्षणःकुशलःविद्वान्वर्णीब्रह्म
चारीवर्णिनोब्रह्मचारिणइत्यमरः वर्णाद्ब्रह्मचारिणीतिइतिप्रत्ययः सकौत्सःप्रस्तुतंप्रकृतमाचचक्षे १९ समाप्तमे
ति समाप्तविद्येनमयामहर्षिर्गुरुदक्षिणायैदक्षिणास्वीकारार्थंविज्ञापितोभूत् सचगुरुःचिरायअस्खलितोपा
चारांतांमेभक्तिमेवपुरस्तात्प्रथमंमगणयत् संख्यातवान् भक्त्यैवतुष्टःकिंदक्षिणयेत्युक्तवानित्यर्थः अथवाभक्ति
मेवतांदक्षिणांअगणयदितियोज्यम् २० निर्बंधेति निर्बंधेनप्रार्थनातिशयेनसंजातरुषासंजातक्रोधेनगुरुणा
अर्थकार्श्यंअर्थदारिद्र्यंअचिंतयित्वाअविचार्य्यअहंवित्तस्यधनस्यधनवनस्त्वयोदशकोटीःअष्टादशकोटीर्मे ॥

२३

महे स्माहृतानयेति विद्यापरिसंख्यया विद्यासंख्यानुसारेणेत्यर्थः अत्र मनुः अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः पु
राणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति २१ सोऽहमिति सोऽहं सपर्याविधिभाजनेन नास्यपात्रेण भवन्तं प्रभुशब्द एव शेषो य
स्य तं मत्वा निःस्वं निश्चित्येत्यर्थः श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वाद् इति महत्वात् संप्रत्युपरोद्धुं निर्बन्धं कर्तुं नाभ्यु
त्सहे २२ इत्थमिति द्विजराजकान्तिः चन्द्रकान्तिः द्विजराजः शशधरो नक्षत्रेशः क्षपाकर इत्यमरः तस्मात्सोमो राजा नो
ब्राह्मणानामिति श्रुतेः सोमोऽस्माकं ब्राह्मणानां राजेति वा एनसो निवृत्ता इन्द्रियवृत्तिर्यस्य सः जगदेकनाथो रघुः वेद
विदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थं आवेदितो निवेदितः सन् एनं कौत्सं भूयः पुनर्जगाद २३ गुर्वर्थमिति श्रुतस्य पारं दृ
ष्टवान् श्रुतस्य पारदृश्वा दृशेः क्वनिप् गुरवे गुर्वर्थं गुरुदक्षिणार्थं यथा न या अर्थी याचकः विशेषणमाह येनापि अस्मा[illegible]

निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरे-
ति २१ सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्र-
यस्य २२ इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेक-
नाथः २३ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् गतो वदान्यान्तरमित्ययं मे मा भूत्परीवाद-
नवावतारः २४ स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधि-

त्वर्थे यत्नमाह रघोः सकाशात् कामं मनोरथं अनवाप्य अप्राप्य वदान्यान्तरं दातारं गतः सर्ववदान्यः स्थूललक्षदानशौण्ड
बहुप्रद इत्यमरः इत्येवंरूपस्य परीवादस्य नवो नूतनो यः प्रथमोऽवतारः आविर्भावो मे मा भून्माऽस्तु रघोरिति स्वनामग्र
हणं संभावितद्योतनार्थं तथा च संभावितस्य चाकीर्तिर्मरणादतिरिच्यते इति भावः २४ स इति स त्वं महिते पूजिते
प्रशस्ते प्रसिद्धे मदीये अग्न्यगारे त्रेताग्निशालायां चतुर्थोऽग्निरिव वसन् द्वित्राणि वा अहानि दिनानि संख्ययाव्ययासन्नादू
राधिकसंख्याः संख्येये इति बहुव्रीहिः बहुव्रीहौ संख्येये डजबहुगणादिति डच् सोढुमर्हसि हे अर्हन् मान्य त्वदर्थं तव प्र
योजने साधयितुं यावद्यते यतिष्ये यावत्पुरानिपातयोर्लट् इति लट् भविष्यदर्थे २५ तथेति अग्रजन्मा ब्राह्मणः
प्रतीतः सन् तस्य रघोः अवितथं अमोघं संगरं प्रतिज्ञां अग्रहीत् [illegible] प्रतिज्ञा संविदापन्नः संगर इत्यमरः ॥ श्रीराम

नांगीरमितिकेचित्पठंति तथेति प्रतिग्रहीत् स रघुरपि गां भूमिमात्मसारां गृहीतधनामवेक्ष्य कुबेरादर्थं निष्क्रष्टुमाहर्तुं चा-
कमेइयेष २६ वसिष्ठेति वसिष्ठस्य मंत्रेण उक्षणात् प्रोक्षणात् जातात् प्रभावात् सामर्थ्यात् उदन्वदाकाशमहीधरे-
षु मरुत्सखस्य मरुतः सखा इति तत्पुरुषः बहुव्रीहौ समासांताभावात् तेन वायुसखस्येति लभ्यते वारीणां वाहकोवलाहकः
५ग पृषोदरादित्वात्साधुः तस्येव मेघस्येव तद्रथस्य गतिः संचारो न विजघ्ने न विहता हि २७ अथेति अथ प्रदोषे रजनीमुखे
तत्काले यानाधिरोहविधानात् प्रयतो धीरो रघुः सामंतो राजमात्रमिति संभावनयैव कैलासनाथं कुबेरं तर-
सा बलेन जिगीषुः जेतुमिच्छुः सन् कल्पितं सज्जितं शस्त्रं गर्भे यस्य तं रथं अधिशिश्ये परशेषाशयितवानित्यर्थः अधिशीङ्-

तथेति तस्याऽवितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा गामात्मसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् २६
वसिष्ठमंत्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य २७
अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामंतसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः २८
प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः
तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् दिदेश कौत्साय समस्तमेव शृंगं सुमेरोरिव वज्रभिन्नम् ३०

स्थासोकर्मेति कर्मत्वं २८ प्रातरिति प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोशगृहे नियुक्ता अधिकृता भांडारिकाः सवि-
स्मयाः संतः कोशगृहस्य मध्ये नभस्तो नभसः पंचम्यास्तसिल् पतितां हिरण्मयीं स्वर्णमयीं दाण्डिनायनेत्यादिना निपातनात्सा- स्या २
धुः वृष्टिं शशंसुः कथयामासुः २९ तमिति भूपती रघुरभियास्यमानादभिगमिष्यमाणात् कुबेराल्लब्धं वज्रेणकु-
लिशेन भिन्नं सुमेरोः पादं प्रत्यंतपर्वतमिव स्थितं पादाः प्रत्यंतपर्वताः इत्यमरः शृंगं सुमेरोरिति क्वचित्पाठः तं भासुरं
रा भासुरं भंजभासमिदो घुरजिति घुरच् हेमराशिं समस्तमेव कौत्साय दिदेश ददौ न तु चतुर्दशकोटिमात्रमित्येव
कारार्थः ३० जनस्येति तावदर्थिदातारौ द्वावपि साकेतनिवासिनः अयोध्यावासिनः साकेतः स्यादयोध्यायां कोशला नंदि-
नी च सतीत्यादवः जनस्य अभिनंद्यसत्वौ स्तुत्यव्यवसायौ अभूतां द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जंतुषु इत्यमरः कौ-

मित्यर्थः मा:५ तु १

अर्थिकामादर्थिनो मनोरथादधिकं प्रददातीति तथोक्तः प्रदाज्ञात्शमिकप्रत्ययः न यश्च ३१ अथेति अथ प्रीतमना महर्षिः कौत्सः
संप्रस्थितः प्रस्थास्यमानः सन् आशंसायां भूतवच्चेति भविष्यदर्थे क्तः उष्ट्राणां क्रमेलुकानां वामीनां वडवानां च शतैर्वाहितार्थं
प्रापितधनं आनतपूर्वकायं विनयेन नम्रं प्रशंसायां भूतवच्चेति भविष्यदर्थे प्रजेश्वरं करेण हस्तेन स्पृशन् वाचमुवाच ॥
र·वं· ३२ किमिति वृत्ते स्थितस्य न्यायेनार्जनमर्थस्य वृद्धेन पालनेन तथा सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधमिति कामंदकः कृष्त्रकाम
टी५१ तस्मिन्वृत्ते स्थितस्य प्रजानामधिपतेर्नृपस्य भूः कामान्सूत इति कामसूः यदि सत्सु हि षड्ढ्वेत्यादिना क्विप् लोके किं चित्रं न प्रदय५
51 चित्रमित्यर्थः किन्तु तव प्रभावो महिमा त्वचिंतनीयः येन त्वया द्यौरपि मनीषितं अभिलषितं दुग्धा दुहेर्द्विकर्मकत्वाद

जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यसत्वौ गुरुप्रदेयाधिकनिस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ३१
अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना मनीषी स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२
किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् अचिंतनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ३३
आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पितेव ३४
इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ३५

प्रधाने कर्मणि क्तः प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मकाणाम् अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मण इति स्मर
णात् ३३ आशास्यमिति सर्वाणि श्रेयांसि शुभानि अधिजग्मुषः प्राप्तवतः तेन तव अन्यत् पुत्रातिरिक्तम् आशास्यम् आशीः साध्यं
आशंसनीयं पुनरुक्तभूतं सर्वं सिद्धमित्यर्थः किन्तु ईड्यं स्तुत्यं भवन्तं भवतः पितेव आत्मगुणानुरूपं तवानुरूपगुणमि
त्यर्थः पुत्रं लभस्व प्राप्नुहि ३४ इत्थमिति अग्रजन्मा ब्राह्मणः अग्रजन्मा द्विजश्रेष्ठे भ्रातरि ब्राह्मणेऽस्त्रत इति विश्वः इत्थं रा
ज्ञे आशिषं प्रयुज्य गुरोः सकाशं समीपं प्रतीयाय प्राप राजापि जीवलोको जीवसमूहः जीवः प्राणिनि गीष्पताविति वि ५१
श्वः अर्कादालोकं प्रकाशमिव चैतन्यमिवेति पाठे ज्ञानमिव तस्माद्गुरोराशु सुतं लेभे प्राप ३५ ब्राह्म इति तस्य रघोर्देवीम
हिषी ब्राह्मे तस्येदमित्यण् ब्रह्मदेवताके अभिजिन्नामके मुहूर्ते किल ईषदसमाप्तेः कुमारः कुमारकल्पस्तं ॥राम

दसमहृशे ईषदसमाप्तौ कल्पप्देश्यजातीयर इति कल्पप् कुमारं पुत्रं सुषुवे कुमारं बालके स्कंदे इति विश्वः अतो ब्राह्मे मुहूर्ते।
त्वात्पिता रघुः ब्रह्मणो विधेरेव नाम्ना तमात्मजन्मानं अजं नामकं चकार अजो हरो हरे कामे विधौ छागे रघोः सुते इति वि
श्वः ३६ रूपमिति ओजो तेजस्वि इष्टं वा ओजो दीप्तौ वले इति अवष्टंभ प्रकाशयोः ओजो वले च दीप्तौ चेति विश्वः रूपं वपुः
अथ रूपेन पुंसकं स्वभावाकृति सौंदर्य वपुषु श्लोकशब्दयोरिति विश्वः तदेव वीर्यं तदेव नैसर्गिकं स्वाभावि
कमुन्नतत्वं तदेव नाहंगोवेत्यर्थः कुमारो बालकः प्रवर्जितस्त्यादितो दीपः प्रदीपात्स्वोत्पादितदीपादिव स्वात्स्वकीयान्कार
णादिभ्यो नवभ्यो वेति स्मादिवो वैकल्पिकः कारणाज्जनकान्न बिभिदे भिन्नो नाभूत् सर्वात्मना ताद्दशएवाभूदित्यर्थः ३७

ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ३६
रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वं नकारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७
उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तं श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकांक्ष ३८
अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ३९
तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रं प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं ४०

उपात्तेति गुरुभ्यो विधिवद्यथाशास्त्रं उपात्तविद्यं लब्धविद्यं यौवनस्योद्भेदः आविर्भावस्तेन विशेषकान्तं तं सोमं यं तन्नजं प्रति सा
भिलाषापि श्रीः धीरस्थिरा अन्नतवित्रा स्थिराचित्तो नन्निर्यातंतत्रे मां विमितिसंज्ञिमानिमिति भयालः कन्यापिता पितुरिव गुरोः
रघोः अनुज्ञां आचकांक्ष इयेष यौवराज्यार्हो भवदित्यर्थः अनुज्ञा शब्दाग्निमन्त्या वर्तते ३८ उपमा सामर्थ्यात्स्याग्निग्रहणायो
ग्यता च व्यज्यते अथेति अथ स्वसुः भगिन्याः इन्दुमत्याः स्वयंवरार्थं कुमारस्याजस्यानयने उत्सुकेन क्रथकैशिका
नां विदर्भदेशानामीश्वरेण स्वामिना भोजेन राज्ञा आप्तो हितो दूतो रघवे विसृष्टः प्रेषितः क्रियामात्रयोगेपि चतुर्थी आप्तग्रहणा
न्मैव नात्यर्थ्य प्रोत नार्थः ३९ तमिति असौ रघुः श्लाघ्यसंबन्धं श्लाघ्यः संबन्धो यस्य तं चाननतादिगुणायोग्यहरणीयसंबंधं विचिन्त्य वि
चार्य पुत्रं च दारक्रियायोग्यदशं विचिन्त्य ससैन्यमेनं पुत्रं ऋद्धां विदर्भाधिपस्य भोजस्य राजधानीं पुरीं प्रति प्रस्थापयामास प्रेषय

तस्येति उपकार्य्याः राजयोग्येषु पटभवनादिषु सौधोऽस्त्री राजसदनमुपकार्य्योपकारिकेत्यमरः नच नव्याख्याने स्त्रीरस्वा
मी उपक्रियते उपकरोतीति च पटमंडपादि राजसदनमिति रचिता उपचाराः शयनादयो येषु तेन थोक्ताः जानपदानां जन
पदेभ्य आगतानां उपदाभिरुपायनैः वन्याः वनेभवाः इतरे येषां ते वनेतराः अवन्या इत्यर्थः न बहुव्रीहाविति सर्वनामसंज्ञा
निषेधः नतु रूपे सर्वनामसंज्ञा इर्वारैव तस्य मनुजेन्द्रसूनो राजस्य मार्गे निवासाः वासनिका उद्यानान्याक्रीडाः पुमा
नाक्रीड उद्यानमित्यमरः तान्येव विहाराः विहाररम्याणि तेन कल्पास्तत्सदृशा इत्यर्थः ईषदसमाप्ताविति कल्पप्प्रत्ययः
बभूवुः ५१ सइति विलंघिताध्वा तिक्रान्तमार्गः सोऽजः शीकरार्द्रैः शीतलैरित्यर्थः मरुद्भिर्वातैरानर्तिताः कंपिताः न
क्तमाला यस्मिन् तस्मिन्निवेशाहे इत्यर्थः चिरबिल्वाख्य वृक्षभेदाः चिरबिल्वो नक्तमालः करजश्च करंजके इत्यमरः न।

तस्यापकार्य्या रचितोपचारा वन्येतराजानपदोपदाभिः मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ५१
स नर्म्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशयामास विलंघिताध्वा क्लान्तं रजोधूसरकेतु सैन्यं ५२
अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः निर्धौतदानामलगंडभित्तिर्वन्यः वन्या सरित्तो गज उन्ममज्ज

र्म्मदाया रोधसि तीरे वायाली रे क्लान्तं श्रान्तं रजोभिः धूसराः केतवो यस्य तत्सैन्यं निवेशयामास ५२ अथेति अथोपरिष्टा
दूर्ध्वं उपर्युपरिष्टादिति निपातः भ्रमद्भिर्मदलोभादिति भावः भ्रमरैः प्रागुन्मज्जनात्पूर्वं सूचितो ज्ञापितोन्तः सलिले
प्रवेशो यस्य स तथोक्तः निर्धौतदाने क्षालितमदे ते अतएव अमले गंडभित्ती यस्य स तथोक्तः दानं गजमदे त्यागे चेति
शाश्वतः निर्धौतदानाचासौ अमलगंडभित्तिश्च प्रशस्तौ गंडौ गंडभित्ती प्रशंसावचनैश्चेति समासः भित्तिशब्दः प्रा
शस्त्यार्थः तथा गगरत्नमहोदधौ मतल्लिकोद्दिमिश्राः स्युः प्रकांडस्य लभिन्नयश्चेति भित्तिः प्रदेशो वा भित्तिः प्रदेशे
कुड्येपीति विश्वः निर्द्धौतदानेनामले गंडभित्ती यस्येति वा वन्यो गजः सरितो नर्म्मदायाः सकाशात् पंचम्यास्तसिल् उन्म
मज्ज उत्थितः ५३ निःशेषेति किल तद्गो गजः निःशेषं विक्षालितं धातुनापि धौतं गैरिकादिनापि नीलाभिरूर्ध्वाभिः
तदाभिघ्यजलजनिताभिः शबलेन कर्बुरेणाश्चित्रे किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः अश्मभिः पाषाणैर्वि कुं ५२

तस्पतटेषु वप्रक्रियां न प्रक्रीडं उत्खातकेलिमित्यर्थः उत्खातकेलिः शृंगाद्यैर्वप्रक्रीडनि गद्यते इति शाश्वतः शंसन् कथ
यन्नुच्चयन्नित्यर्थः ५४ संहारेति संहारविहे पयोः संकोचनप्रसारणयोः लघु क्रियेणाद्दिप्रव्यापारेण लघुर्ह्दिप्रमंद
इतमित्यमरः हस्तेन शुंडादंडेन हस्तेन हस्तवमेरेस्यात्करेभकरयोरपीति विश्वः सशाहूं सद्यावं हरूतः नरंगान् भिदन् वि
दारयन् नीराभिमुखः स गजः वारी गजबंधनस्थानं वारी तु गजबंधनी तु यादवः वार्येः श्रृंगीलायाः विर्धभस्य भंगे भंज
ने प्रवृत्तः ऽरववभौ ५५ शैलेति शैलोपमः स गजः शैवलमंजरीणां जलानि हूत्वा निनरसाकर्षन्त्यत्र स्तंभस्त सर्पदर्वं तेन
गजेनोत्पीडितोऽन्यवारि राशिर्यस्य सः सरित्प्रवाहस्तटमनुसस्मार ५६ तस्येति तस्यैकनागस्य काकिनो गजस्य कपोल
भित्तौ गंजस्राव गाढ़ेनाहुरणमात्रशांता निहतामदतुर्दिनश्रीर्मदवर्षलक्ष्मीर्वन्यैतवारंगणामन्यगणस्यानेकयानं द्विपानादरो।
निशेषविद्याल्लितपानुनापिवप्रक्रियामस्तुवतलतटेषु नीलोत्खेरखाभवलेन शंसन्नर्दं तमुद्दयेनाष्यमविकुंठि
तेन ५४ संहारविहेपलघुक्रियेण हस्तेन नीराभिमुखः सशाहूम् बभौ सभिदन् हरूत मस्तरंगान् वालानीलाभं
गरववृत्तः ५५ इति युग्मं शैलोपमः शैवलमंजरीणां जालानि कर्षन्नतरसासपश्चात् ऊर्वतदुत्पीडितवा
रिराशिः सरित्प्रवाहास्तटमनुसस्मार ५६ तस्यैकनागस्य कपोलभित्योर्जलावगाहाहरणमात्रशांता वन्येतरा
नेकपदर्शनेन पुनर्दिदीपे मदतुर्दिनश्रीः ५७ समच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिता
नेन पुनर्दिदीपे वहृये ५७ समच्छदेति समच्छदस्य वृक्षविशेषस्य क्षीरवत्कटुभिः प्रवाहः प्रसारो यस्य तं कटुभिः कषा
याम्लैः सोरभ्येपि प्रकीर्तितानाऽइति यादवः असह्यं तदीयं मदमाघ्राय सेना गजेन्द्राः विलंघितनिगृह्य वक्तृतः आधोरणानां ह
स्तिपकानां नीत्रोमहान्प्रयत्नो येस्ते तथोक्ताः सेनः आधोरणा हस्तिपकाः हस्तारोहा निवादिनः इत्यमरः विमुखाः पराङ्मु
खाः बभूवुः ५८ स इति स गजः छिन्नबंधाः द्रुताः पलायिताः युगं वहतीति युग्याः वाहाः यस्मिन्सः सचासौ भग्न प्रवृत्त
ग्राः अवृद्याः रथावयवाः दारुविशेषाः अक्षोरथस्यावयवे पाशके पुस्कत्वमिन्द्रियमिति शाश्वतः अत एव ययास्ताः पतिता

र॰वं॰
टी॰५३
53

तो संरब्धेरोगे विह्वला व्याकुलाः विह्वलव्याकुलौ समावित्यमरः योधा यस्मिन् तं सेनानिवेशं शिविरं क्षणेन तुमलं संकुलं
चकार ४९ तमिति नृपतेः राज्ञः करी अवध्य इति श्रुतवान् शास्त्रज्ञानवान् कुमारः आपतन्तं अभियान्तं तं गजं निवर्तयि
ष्यन् न तु प्रहरिष्यन् अतएव नात्यायतमनतिदीर्घं नञर्थस्य नशब्दस्य सुप्सुपेति समासः कृष्टशार्ङ्गः ईषदाकृष्टचापः
सन् विशिखेन वाणेन कुंभे जघान अत्र चाणक्यः लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात् इयं हि श्रीर्यत्करिणः
इति अतएव युद्धादन्यत्रेत्यातनार्थमेव वन्यग्रहणं कृतं ५० स इति स गजो विद्धमात्रः ताडितमात्रः किल न तु प्रहृतः तथापि

स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्राणविहस्तयोधं सेनानिवेशं तुमलं चकार ४९
तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः निवर्तयिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टचापः
५० स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्र
पेदे ५१ अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोरस्थल
तारहारः मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वम् अवेहि गंधर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्श नस्य

नागरूपं गजशरीरं उत्सृज्य तेन विस्मितेन तद्विस्मितैः सैन्यैर्दृष्टः सन् स्फुरतः प्रभामण्डलस्य मध्यमावर्त्ति कान्तं मनोह
रं व्योमचरं प्रपेदे प्राप ५१ तथेति अथ प्रभावोपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारमज
मवकीर्य अभिवृष्य दशनप्रभाभिर्दन्तकान्तिभिः संवर्द्धिता उरःस्थले ये तारहाराः स्थूलमुक्ताहाराः येन स तथो
क्तः वाचोऽस्य सन्तीति वाग्मी वाचो ग्मिनिरिति ग्मिनि प्रत्ययः स पुरुष उवाच ५२ मतंगजेति अवलेपमूलात्कृतः कान्
अवलेपस्तु गर्वे स्याल्लेपने दूषणेपि चेति विश्वः मतंगस्य मुनेः शापात् मतंगजत्वं प्राप्तवानस्मि मां प्रियदर्शनस्य ५२
प्रियदर्शनाख्यस्य गंधर्वपतेः गंधर्वराजस्य तनूजं पुत्रं स्त्रियां त्रिषु तनुस्तनूरित्यमरः तन्वादेर्वेति केचिदत्र ऊङ्
प्रियंवदा प्रियंवदाख्यं मामवेहि जानीहि प्रियं वदतीति प्रियंवदः प्रियवशे वदः खच् इति खच् ५३

त्युक्तः इति स महर्षिश्च प्रसादेन मया अनुनीतः सन् पश्चान्मदुक्तो शान्तिमगमन् अगच्छत् तथाहि जलस्य उष्णत्वं अग्न्यातपसंवा
संयोगात् संपर्कात् न तु प्रकृत्या उष्णत्वं यच्छैत्यं सा प्रकृतिः स्वभावः विधेयप्राधान्यात्स्त्रीलिंगनिर्देशः महर्षिर्गामपि।
शान्तिरेव स्वभावो न क्रोध इत्यर्थः ५४ इक्ष्वाक्विति इक्ष्वाकुवंशः प्रभवो यस्य सोऽजः यदा ते कुंभमयोमुखेन लोहाग्रेण शरेण

रघु भेत्स्यति विदारयिष्यति तदा स्वेन वपुषा महिम्ना पुनः संयोक्ष्यसे संगंस्यसे इति स तपोनिधिर्माममवोचत् ५५ संमोचित इ
ति चिरं प्रार्थिते दर्शने यस्य तेन सत्त्ववता बलवता त्वया अहं शापात् संमोचितः मोक्षं प्रापितः भवतस्तव प्रतिप्रियं प्रत्यु

स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृ
तिर्जलस्य ५४ इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्य
वोचत्स तपोनिधिर्माम् ५५ संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियं चेद्भवतो न
कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ५६ संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रम् गांधर्वमाद
त्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५७ अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वम्

कारेण कुर्यां मे स्वपदोपलब्धिः स्वस्थानप्राप्तिः पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः वृथा स्यात् तदुक्तं प्रति
कर्तुमशक्तस्य जीवितान्मरणं वरमिति ५६ संमोहनमिति हे सखे सखिशब्देन समप्राणतोक्ता यथोक्तं अत्यागसह
नो बंधुः सदैवानुमतः सुहृत् एकक्रियं भवेन्मित्रं समप्राणः सखा मत इति प्रयोगसंहारयोः प्रक्षेपसंकोचयोः वि
भक्तमंत्रं गांधर्वं देवताकं संमोहयतेनेनेति संमोहनं नाम ममास्त्रमादत्स्व गृहाण यतः अस्त्रात् प्रयोक्तुरस्त्रप्रयोगिणोऽरिहिंसा
न विजयश्च हस्ते हस्तगतो विजयो भवतीत्यर्थः ५७ वयं लज्जितः कथमस्त्रं गृह्णाम्यस्वरस्यामिति चेत्तत्राह अलमिति
किं त्वं मां प्रति ह्रिया प्रहारनिमित्तया अलं कुतः यद्यतो हेतोस्त्वं मां प्रहरन्नपि मुहूर्तं दयापरः कृपालुरभूत् तस्मादु
पच्छंदयति प्रार्थ्यमानेन मयि त्वया प्रतिषेधः परिहारः स एव दोषः पारुष्यं तन्न प्रयोज्यं न कर्तव्यं न चेति ना।

सोमश्चन्द्र इव नृसोमः सोमो ओषधी चन्द्रयोरिति शाश्वतः पुरुषश्रेष्ठ इत्यर्थः उपमित समासः अस्त्रविदास्त्रज्ञः सोऽजः तथेति सोम
उद्भवो यस्याः सोमोद्भवायाः सरितो नर्मदायाः रेवा तु नर्मदा सोमोद्भवेत्यमरः पवित्रं पय उपस्पृश्य पत्वा चम्य इत्यर्थः उदङ्मुखः सन्
निगृहीतशापात् उपहतादित्यर्थः तस्मात्प्रियंवदात् अस्त्रमन्त्रं जग्राह तत् जुष्टिं तेन गृहीतवान् ५९ एवमिति एवमध्वनि मार्गे दै
र॰ वं॰ वयोगाद्दैववशात् अचिन्त्यहेतु अनिर्देश्यहेतुकं सख्यं मैत्रीत्वं सख्युर्य इति यः आसेदुषोः प्राप्तवतोः तयोर्मध्ये एको गन्धर्वः
टी ५८ चित्ररथस्य कुबेरोद्यानस्य प्रदेशान् अस्योद्याने चैत्ररथमित्यमरः अपरोऽजः सौराज्येन राजन्वत्तया रम्यान्विदर्भदेशान्ययौ ६०
54 तमिति नगरस्योपकण्ठे समीपे तस्थिवांसं स्थितं तमजं तस्याजस्यागमनेन आरूढान्नृत्यन्तो गुरुः प्रहर्षो यस्य सः क्रथके

तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ५८ तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृ
सोमः उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ५९ एवं तयोरध्वनि दैवयोगादासेदुषोः
सख्यमचिन्त्यहेतुः एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ६० तं तस्थिवांसं नगरोपकण्ठे
तदागमारूढगुरुप्रहर्षः प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ६१ प्रवेश्य चैनं पु
रमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ६२

शिकेन्द्रो विदर्भराजः प्रवृद्धोर्मिः ऊर्मिमाली समुद्रश्चन्द्रमिव प्रत्युज्जगाम ६१ प्रवेश्येति एवमजमग्रयायी सेवार्थमग्रगा
मी पुरो गच्छन्नित्यर्थः नीचैर्नम्रः पुरं प्रवेश्य प्रवेशं कारयित्वा प्रीत्या अर्पितश्रीस्तथा तेन प्रकारेणोपचरन् उपचरितवान्
यथा येन प्रकारेण तत्र पुरे समेतो मिलितो जनो वैदर्भं भोजमागन्तुं प्राघुणिकं मेने अजं गृहपतिं मेने ६२ तस्येति र
घुपतिरिति यः रघुकल्यः रघुतुल्यः इत्यर्थः उक्तं च दण्डिना सादृश्यवाचकप्रस्तावे कल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी ५८
अपीति सोऽजः प्रणतेन नम्रेण वृद्धैः कर्तृभिः तस्य भोजस्याधिकारे नियोगः तस्य पुरुषैरधिकृतैरित्यर्थः प्रदिष्टां निर्दि
ष्टां प्राग्द्वारस्य वेदीं विवेश ।

वेशितः प्रतिस्थापितः हेमकुम्भो यस्यां तां स्थापितमङ्गलकलशामित्यर्थः रम्यां रमणीयां नवोपकार्यां नूतनराजभवनं उप
कार्या राजसद्मन्युपचारवितानेष्वपि इति विश्वः मदनो बाल्यात्परां शैशवादनन्तरां दशामिव यौवनमिवेत्यर्थः अध्युवासः
अधिष्ठितवान् तन्नाधितवानित्यर्थः उपान्वध्याङ्वसः इति कर्मत्वं ६३ तत्रेति तत्रोपकार्यायां स्वयंवरनिमित्तं समाहृतः
सम्मेलितो राजलोको येन तत् कमनीयं स्पृहणीयं कन्याललामकन्यासु श्रेष्ठं ललामोऽस्त्री ललामापि प्रभावेऽपि पुरुषे ध्वजे श्रे
ष्ठभूषायां पुण्ड्रे शृङ्गपुच्छे चिह्नाश्वलिङ्गिषु इति यादवः लिप्सोः लब्धुमिच्छोः लभेः सन्नन्तादुः प्रत्ययः अजस्य भावावबोधे पुरुष
स्याभिप्रायपरिज्ञाने कलुषा असमर्था दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव राजानं कामिनं चौरं प्रविशं

तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितहेमकुम्भाम् रम्यां रघुप्रतिनिधिः स नवोपकार्यां
बाल्यात्परामिव दशां मदनोऽध्युवास ६३ तत्र स्वयंवरसमाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः
भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ६४ तं कर्णभूषणनिपीडितपीवरांसं श
य्योत्तरच्छदविमर्दकृशाङ्गरागम् वैतालिका ललितबन्धमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः ६५

ति प्रजागरा इति भावः अभिमुखी सहोढी वेनाच्छोतावा ६४ तमिति कर्णाभूषणाभ्यां निपीडितौ पीवरौ पीनौ अंसौ य
स्य तं शय्यायाः उत्तरच्छदस्योपरिस्थास्तरणस्य विमर्देन घर्षणेन कृशो विरलोऽङ्गरागो यस्य तं नवङ्गनासंगादिति भावः
प्रथितवाचं प्रकृष्टज्ञानेन नमेन मजं सवयसः समानवयस्काः उदारवाचः प्रगल्भगिरः सूतात्मजाः वन्दिपुत्राः वैतालि।
का इति पाठः वैतालिका बोधकराः इत्यमरः वाग्भिः स्तुतिपाठैः उषसि प्रबोधयन् प्रबोधयामासुः ६५ रात्रिरिति हेमन्तिमता
वर निर्धारणे षष्ठी रात्रिर्गता शय्यां च विजिति द्रोभवेत्यर्थः विनिद्रत्वफलमाह धात्रेति धात्रा ब्रह्मणा जगतो धूर्भारः।
धूः स्याद्यानमुखे भार इति यादवः द्विधा वहयो द्वेवेत्यर्थः एवकारस्तृतीयनिषेधार्थः विभक्ता नन्वविभज्य स्थापिता
खलः तत्कि मतस्याह तेरतु एकतः एककोटौ न वशुरुः।

पितोविनिद्रः सन् विभर्त्तितस्याधुरोभवान् ५८ एवंवहतीतिधुर्य्योभारवाहकस्तस्यपदंस्थानंतत्पदंधुर्य्यपदंतदवलंबीनतो
विनिद्रोभवेत्यर्थः नह्युभयवाह्यएववहतीतिभावः ६६ निद्रेति चंद्रारविंदराजवदनादयोलक्ष्मीनिवासस्थानानीति
प्रसिद्धमाश्रित्योच्यते निद्रावशेननिद्राधीनेन त्वयासंगोत्रस्यत्वत्तोभवतापर्युत्सुकत्वमपित्वय्यनुरक्तमयीत्यर्थः प्र
र॰वं॰ सितेनास्तकाभ्यांतनीयाचेतिसप्रम्यर्थेतनीया अपिशब्दः लग्नेषयानुरागस्यानपेक्षत्वद्योतनार्थं निशिखंडिता
५५ भर्त्तुरन्यासंगज्ञानकलुषिताश्चवलेवनायिकेव ज्ञातेन्यसंगविकृते खंडितेर्ष्याकषायितेतिदशरूपके अतएवस्वा
55 मात्यामविचारयंतीतिसतीडयेस्वमारोप्यर्थः लक्ष्मीर्येनचन्द्रराससदृशत्वदाननसदृशत्वादितिभावः सचंद्रोपि।

रात्रिर्गतामतिमतांवर मुंचशय्यांधात्राद्विधैवननुधूर्जगतोविभक्ता। यामेकतस्तवविभर्त्तिगुरुर्वि
निद्रस्तस्याभवानपरधुर्य्यपदावलंबी ६६ निद्रावशेनभवताप्यनवेक्ष्यमाणापर्युत्सुकत्वमबला
निशिखंडितेव लक्ष्मीर्विनोदयतियेनदिगंतलंबीसोपित्वदाननरुचिंविजहातिचन्द्रः ६७

दिगंतलंबीपश्चिमाशागतः सन् अस्तंगच्छन्नित्यर्थः अतएवत्वदाननरुचिंविजहाति त्वन्मुखसादृश्यंत्यजतीत्यर्थः
अतोनिद्रांविहायतोलक्ष्मीमनन्यशरणांपरिग्रहाणेत्यर्थः अथवा निद्रावशेनभवताप्यनवेक्ष्यमाणाकर्म्मणि।
शानच् लक्ष्मीः प्रयोजककर्त्तायेनचंद्रेणप्रयोज्येनपर्युत्सुकत्वंत्वद्विरहवेदनांकालमतेवडोत्सुक्यं मनस्तापः।
ज्वरादिकं इत्यलंकारे विनोदयतीतिनिरासयतीतियोजनाशेषंपूर्ववत् नाथस्तु अर्थापत्तिमपश्यन्नहंसंपदसाम्
पेक्षितः ६७ तदिति तस्मात् लक्ष्मीपरिग्रहकारणाद्धलङ्गनामनोज्ञेन वल्गुस्थानेमनोज्ञेचवल्गुभाषितमन्यवा।
दितिविश्वः युगपत्तावद्गुन्मिषितेनयुगपदेवोन्मीलितेनसद्योह्यपिपरस्परतुल्लाअन्योन्यसादृश्यंअधिरोढुंतो ५५
प्राप्नुतो प्रार्थनायांलोट् केहे अतः प्रस्पंदमानाचलेतीपरुषेतरा।

स्निग्धा तारा कनीनिका यस्य तेन तथोक्तेन तारकाक्ष्णः कनीनिके त्यमरः तव च दृशां तैः प्रचलितभ्रमरं च लब्धं गेयं यत्र च युगप
दुन्मेषे सति संपूर्णसाहृदय्यलाभ इति भावः ९८ हेतोरिति विभानवायुः प्रभातवायुः स्वाभाविके नैसर्गिके तेन तव मुखमारु
तस्य निश्वासपवनस्य सौरभ्यं नाहरति वा सौरभ्यमित्यर्थः परगुणेन आत्मीयगुणेन संक्रामिके मित्यर्थः ईश्वरामुमि
क्कुरिव आपद्गृह्य यामीन् इति ईकारादेशः अनीकहानां दृढानां रागिणां अथ शिथिलं प्रख्यं हृत्वा नान्यत्र सवाहयनात् हेतेभ्रमवर्धन
मित्यमरः हरति आदत्ते अरुणांशुभिन्नैः तरणिकिरणोद्भेदितैः सरसिजैः कमलैः सह तत्तुल्यत्वं हरति वकुलमिति स
म्यग्व्याप्यलकं सतत ज्यते संगच्छते सज्जैः देवादिकान् कर्णैरिलट् ९९ ताम्रेति ताम्राद रेणु अरुणाभ्यंतरे अनरुपल्लवेषु प
त्रदलानां युगपदुन्मिषिते नतावन्तः परस्परं तुलामधिरोहन्तात्‌ प्रस्पंदमानपरुषेतरतारमंतश्छन्नं लवप्रव
लितभ्रमरं च पक्ष्म ९८ हेतोस्तथैव हरति तुष्टमनीकहानां संसज्यते सरसिजैररुणांशुभिन्नैः स्वाभाविके
परगुणेन विभातवायुः सौरभ्यमीप्सितवत्ते मुखमारुतस्य ९९ ताम्राद रेणुपतितं द्रुमपल्लवेषु निर्धौतहारगु
लिकाविशदं हिमांशोः आभाति लब्धपरभागतया यथोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयम् १०० याव
त्प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीरयाते किं वा द्विषस्त
तिते निर्धौतानां हारगुलिकानां मुक्तामणीनां यः तद्वद्विशदं हिमांशोः लब्धपरभागतया लब्धोत्कर्षतया परभागो गुणोत्कर्ष इ
त्यादवः अधरोष्ठे पतितं त्वदीयं सदशनार्चिदन्तकान्तिसहितं लीलास्मितमेव भाति शोभते १०० यावदिति प्रतापनिधि
स्तेजोनिधिर्भानुर्यावन्नाक्रमते नोद्गच्छति आङ उद्गमने इत्यात्मनेपदं भानावन्वादित एवेत्यर्थः अह्नाय झटिति द्रा
ग्झटित्यंजसा न्वहेत्यमरः अरुणेनानूरुणा सूर्यसूतेनारुणोनूरुरित्यमरः तमो निरस्तं तथाहि द्वे वीर त्वयि आयो
धनेषु युद्धेषु अग्रसरतां पुरःसरतां याते सति तव गुरुः पिता विपन्नत्रयमुच्छिनत्ति किं वा नो छिनत्ति अपि तु छिनत्त्येवेत्यर्थः तत्सपुरु
षयोगपत्यस्तभावाद्गुणानां स्वामिनां स्वयं व्यापारे खेदः इति भावः १०१

र. वं.
टी ५६
ते ५ 56

शय्यामिति उभाभ्यां पक्षाभ्यां विनीता निद्रा येषां ते उभयपक्षविनीतनिद्राः अत्र समासविषये उभशब्दस्थाने उभयशब्दप्र
योग एव साधुरित्यनुसंधेयं यथाह कैयटः नञोभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभय
शब्दस्य प्रयोगो माभूत् उभशब्दस्यैव यथा स्यात् उभयपुत्र इत्यादि भवतीति मुखरा रणत्या नु चलनात्कूजायमाना
निशृंखलानि निगडानि कर्षन्तीति तथोक्ताः तेन व स्तंबे रमन्तीति स्तंबेरमाः हस्तिनः स्तंबकर्णयो रमिजपोरित्यच् प्र
त्यये हलदन्तात् चकयोरित्युक्तत्वात् उभः स्तंबेरमः पद्मीत्यमरः तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् शय्यां जहा
तीत्यज्ञतितेषां स्तंबेरमाणां दन्ताः कोशा इव कोशाः दंडकुड्मलाः नवरागा नवरागारागयोगात् बालार्करुणासंपर्कोद्भेतो

शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते येषां विभाति तरुणारुणरागयो
गाद्भिन्नाद्रिगैरिकतटा इव दंतकोशाः ७२ दीर्घेष्वमी नियमिताः पटमण्डपेषु निद्रां विहाय वनजा
क्ष वनायुदेश्याः वक्त्रोष्मणा मलिनयन्ति पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः ७३ भवति
विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति [illegible]

उभयेनासंबंधमिति शयानेनारांगतिमा वेनसंसृष्टिः ५

भिन्नाद्रिगैरिकतटा इव विभान्तीत्यर्थः ७२ दीर्घेष्विति हे वनजाक्ष नीरजाक्ष वने नीरे वने सलिलमिति शाश्वतः दीर्घेषु पटमण्ड
पेषु नियमिताः बद्धाः वनायुदेश्याः वनायुदेशोद्भवाः पारसीका वनायुजा इति हलायुधः अमी वाहाः अश्वाः निद्रां विहाय
पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि सैन्धवोऽस्त्री शीतशिवं मणिमन्थं च सिन्धुजमित्यमरः वक्त्रोष्मणा मलि
नयन्ति मलिनानि कुर्वन्ति उक्तं च सिंधुयोगसंग्रहे सर्वाह्नकाले चाश्वानां प्रायशो लवणं हितम् म्लानाहविबन्धघ्नं लवणां
ल्ला सैन्धवं वरमिति ७३ भवतीति म्लानः पुष्पोपहारः पुष्पपूजा म्लानत्वादेव विरलभक्तिः विच्छिन्नरचनो भवति प्रदीपाश्च र ५६
स्वकिरणानां परिवेषस्य मण्डलस्य उद्भेदेन स्फुरणेन शून्या भवन्ति निस्तेजस्का भवन्तीत्यर्थः अपि च अयं मञ्जुवाग् मधुरव
चनः पंजरस्थस्ते तव शुकः त्वत्प्रबोधनिमित्ते प्रयुक्ताम् उच्चारितां नोऽस्माकं गिरं वाणीमनुवदतीत्यर्थः श्लेषे प्रभातलिंगानि

इतीति इतीत्थं विरचितवाग्भिः वंदिपुत्रैः वैतालिकैः पुत्रग्रहणं समानवयस्कत्वद्योतनार्थं सपदि विगतनिद्रः कुमारः तल्पं श
य्यां तल्पं शय्याट्टदारेष्वित्यमरः उज्झांचकार विससर्ज इजादेश्च गुरुमतोनृच्छ इत्याम्प्रत्ययः कथमिव मदेन पटु निनदद्भिः
राजहंसैर्बोधितः सुप्रतीकाख्यः सुरगजः गंगाया इदं गांगं सैकतं पुलिनमिव तोयोत्थितं तत्पुलिनं सैकतं सिकतामयं
मित्यमरः सिकताशर्कराभ्यां चेत्यणप्रत्ययः सुप्रतीकग्रहणं प्रायशः कैलासवासिनः सुरगजस्य गांगतटविहार
संभवादित्यनुसंधेयं ७५ अथेति उत्थानानंतरं अंचितानि रुचिराणि अक्षिपक्ष्माणि यस्य सोऽजः शास्त्रदृष्टमवग

इति विरचितवाग्भिर्वंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार मदपटुनिनदद्भिर्बोधितो राज
हंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ७५ अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमंचिताक्षि
पक्ष्मा कुशलविरचितानुरूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थम् ७६ इति श्रीरघुवंशे महाका
व्ये श्रीकविकालिदासकृतौ अजस्वयंवराभिगमनो नाम पंचमः सर्गः ५

तं दिवसमुखोचितं प्रातःकालोचितं विधिमनुष्ठानं अवसाय्य समाप्य स्पते रांपताल्लप्य कुशलैः प्रधानदक्षैः विरचितो
ऽनुरूपः स्वयंवरोचितो वेषो नेपथ्यं यस्य तथोक्तः सन् स्वयंवरस्थं क्षितिसमाजं राजसमूहं अगात् अगमत् इणो गा
लुङीति गादेशः पुष्पिताग्रावृत्तमेतत् अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति ७६ इति श्री
पदवाक्यप्रमाणकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां पंचमः सर्गः ५ ॐ अनन्तं यन्मूर्ध्नि यादे चा
कालकंठ वपुष्यः घ कामारिं कामनातेवाकं चिदेकं भजामहे १ सतत्रेति सोऽजस्तत्रस्थाने उपराजवत्सु राजोपकर
णोवत्सु मंचेषु पर्यंकेषु सिंहासनस्थानमनोज्ञवेषान्मनोहरनेपथ्यान् वैमानिकान् विमानैश्चरंती चरतीति ठ
क्प्रत्ययः मरुतामपराणां मरुतोपनामवा इत्यमरः आरूढलीलान्नानासोभाग्यान् ॥ श्रीरामचंद्राय नमः ॥

र॰वं॰
टी॰ ५८
57

आकृष्टमनुल्लीलान्नित्यर्थः सापेक्षत्वेपिगमकत्वात्समासः नरलोकं पालयन्तीति नरलोकपालाः कर्मण्यण्प्रत्ययः तान्नृपा
लानपश्यत् १ रतेरिति रतिः स्मरप्रियायां च रागे च स्त्रवते स्त्रनाशतिविश्वः रतेः कामप्रियायाः गृहीतानुनयेन स्वीकृतप्रार्थ
नेनगृहीतरत्यनुनयेनेत्यर्थः सापेक्षत्वेपिगमकत्वात्समासः ईश्वरेण प्रत्यर्पितस्वांगं कामम् इव स्थितं काकुत्स्थमजं आ
लोकयतां नृपाणां मनः इन्दुमतीनिराशं निस्पृहं बभूव इन्दुमती सत्यमिमं विहाय नास्मान्वरिष्यतीति निश्चिक्युरि
त्यर्थः सर्वातिशयसौन्दर्यमस्येति भावः वैदर्भेति असौ कुमारो विदर्भराजभोजेन निर्दिष्टं प्रदर्शितं मंचं पर्यंकं कॢप्तेन
सुविहितेन सोपानपथेन मृगराजशावः सिंहपोतः पोतः पाकोर्भको डिंभः पृथुकः शिशुरित्यमरः शिलानां विभंगै

स तत्र मंचेषु मनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपाला
न् १ रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वांगमिवेश्वरेण काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुम
तीनिराशम् २ वैदर्भनिर्दिष्टमसौ कुमारः कॢप्तेन सोपानपथेन मंचम् शिलाविभंगैर्मृगराजशावस्तुंग
न्नगोत्संगमिवारुरोह ३ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः भूयिष्ठमासीदुप
मेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ४ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः

र्भंगीभिः तुंगमुन्नतं नगोत्संगं शैलाग्रमिव आरुरोह ३ परार्ध्येति परार्ध्याः श्रेष्ठा वर्णा नीलपीतादयो यस्य तेनास्तर
णेनोपपन्नं संगतं रत्नवत् रत्नखचितमासनं सिंहासनं आसेदिवान् अधिष्ठितवान् सोऽजः मयूरपृष्ठाश्रयिणा
गुहेन सेनान्या स्कन्देन सेनानीरग्निभूर्गुह इत्यमरः भूयिष्ठमत्यन्तमुपमेयकान्तिरासीत् मयूरस्य विचित्रत्वात्तास्य र
त्नासनस्य तद्द्वारा तदारूढयोरिति भावः ४ तास्विति तासु राजपरंपरासु श्रिया कृया पद्योन्नचामेद्यानोपेक्षिषु ५८
विद्यमानेव सहस्रधा विभक्तः तरङ्गेषु तरणिरिव स्वयमेकं संक्रामितः इत्यर्थः प्रभाविशेषस्योदयेनाविनदुर्निरीक्ष्या
दुर्दर्शनः आत्माश्रियः स्त्रवन्पवक्रचत् आद्योतिष्ठद्योलडितिपरस्मैपदं द्युतादित्वादङ्प्रत्ययः ॥ श्रीरामजीसहा

तस्मिन्समये प्रत्येकं संक्रीतलक्ष्मीकत्वात् तेषां किमपि दुरासदं तेजः प्रादुरासीदित्यर्थः ५ तेषामिति महार्घासनसंस्थिता
नां श्रेष्ठसिंहासनस्थाउदारनेपथ्याभृतां उज्वलवेषधारिणां तेषां राज्ञां तेषां राज्ञां मध्ये कल्पद्रुमाणां सुरद्रुमाणां मध्ये
पारिजातस्सुरद्रुमविशेष इव पंचैते देवतरवो मंदारः पारिजातकः संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनमित्यम
रः सुरद्रुमस्तु देवयात्मातेजसा राजभ्यां इति पाठे अतिशयेनेत्यर्थः अत्र कल्पद्रुमशब्दः पंचान्यतमविशेषवचनः उपक
ल्पयंती मनोरथानीति स्तुत्यन्यासुरद्रुमसामान्योपलक्षणतया प्रयुक्तः अन्यत्र सर्वेषां कल्पाः इति द्रुमः कल्पद्रुमः इति विग्रहः ६
सहस्रधात्माव्यरुचद्विभक्तः पयोमुचो पंक्तिषु विद्युतेव ५ तेषां महार्हासनसंस्थितानां मुदारनेपथ्यभृतां
स मध्ये रराजधाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ६ नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वा
न्नृपतीन्निपेतुः मदोत्कटे रेचितपुष्पवृक्षा गंधद्विपेवन्यइवद्विरेफाः ७ अथ स्तुते वंदिभिरन्वयज्ञैः
सोमार्कवंश्ये नरदेवलोके संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयंती ८
नेत्रव्रजा इति पौरजनस्य नेत्रव्रजाः सर्वान्नृपतीन्विहाय तस्मिन्नजे निपेतुः स एव सर्वेषां प्रमोदहेतुरित्यर्थः कथमिव म
दोत्कटे मदेनोद्भिन्नगंडे रेचितनिर्भरे वा वन्ये गंधद्विपे गंधप्रधाने गजे रेचिता रिक्तीकृताः पुष्पाणां वृक्षा येस्तेषु पु
ष्पवृक्षाः इत्यर्थः द्विरेफा भृंगाः इव वन्यविशेषणं पुष्पवृक्षत्यागसंभावनार्थं ७ अथेति पुरेति मनुष्येति त्रिभिः
कुलकं अथान्वयज्ञैः राजवंशाभिः स्तुतिपाठकैः वंदिनः स्तुतिपाठकाः इत्यमरः सोमार्कवंश्ये सोमसूर्यवंशभवे न
रलोके राजलोके स्तुते सति विशिष्य तत्रेशा संवेद्यः एवमत्तरत्रापि योज्यं संचारिते सं तान्यसारिते अगुरुसा
रो योनिः कारणं यस्याः तस्मिन्धूपे च वैजयंतीः पताकाः समुत्सर्पति सति ८ पुरोपेति किंच पुरस्य पकंठे समीपे
उपवना श्रयोयेषांतेषां कलापिनां वर्हिणां संगं उद्धृतन्नत्यहेतौ मेघध्वनिसादृश्यशालाउपकारिणो प्रथमानाः प्ररिताः

र्ये मंगलप्रयोजनके तूर्यस्वने वाद्यघोषे परितो दिगंतान् मूर्छति व्याप्नुवति सति ९ मनुष्येति पतिं वृणोतीति पतिंवरा स्व
यंवरा अथ पतिंवरा स्वयंवरा च वर्या चेत्यमरः संज्ञायां भृतृवृजी त्यादिना खच् प्रत्ययः क्लृप्तविवाहवेषा कन्या इन्दुमती
मनुष्यैर्वाह्यं परिवारेण परिजनेन शोभि चतुरस्रयानं चतुरस्रवाहनं शिविकामध्यास्य मंचांतरं मंचमध्ये यो राजमार्गः
र॰वं॰ तं विवेश १० तस्मिन्निति नेत्रशतानामेकलक्ष्ये एकदृश्ये कन्यारूपे तस्मिन्विधातुर्विधानातिशये सृष्टिविशेषे नरेन्द्राः
टी॰ ५८ अन्तःकरणैर्निपेतुः आसनेषु देहैः केवलं देहैः स्थिताः देहानपि विस्मृत्य तत्रैव दत्तचित्ता बभूवुरित्यर्थः अन्तःकरणाक
58

पुरोपकंठोपवनाश्रयाणां शिखण्डिनामुद्धतनृत्यहेतौ प्रध्मातशंखे परितो दिगंतान् तूर्यस्वने मूर्छति
मंगलार्थे ९ मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्यापरिवारशोभि विवेश मंचांतरराजमार्गं पतिंवरा क्लृप्त
विवाहवेषा १० कुलकम् तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये निपेतुरंतःकरणैर्न
रेन्द्रा देहैः स्थिताः केवलमासनेषु ११ तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः प्रवालशोभा इ
व पादपानां शृंगारचेष्टा विविधा बभूवुः १२

र्षैः केवलनिवर्तनेन नरेन्द्राणां कर्तृत्वव्यपदेशः अदेहस्थितिशयार्थः ११ तामिति तामिन्दुमतीं प्रति अभिव्यक्तमनोरथानां प्रकट
वाभिलाषिणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः प्रणयः प्रार्थना प्रेम च प्रणयास्त्वमी विश्रंभयाच्ञाप्रेमाण इत्यमरः प्रणा
येष्वग्रदूत्यः प्रथमदूतिकाः प्रणयप्रकाशकत्वसाम्याद्दूतीत्वव्यपदेशः विविधाः शृंगारचेष्टाः शृंगारविकाराः पादपानां
प्रवालशोभाः पल्लवसंपद इव बभूवुः उत्पन्नाः अत्र शृंगारलक्षणो रसस्तथाकारे विभावैरनुभावैश्च सात्त्विकैर्व्यभिचा
रिभिः नीता सद्यश्यरसत्वं रतिः शृंगार उच्यते रतिरिच्छाविशेषः तच्चोक्तं तत्रैव यूनोरन्योन्यविषयस्थायिनीच्छा रतिः ५८
स्मृता रतिचेष्टाशब्देन तदनुभावविशेषा उच्यन्ते तेपि तत्रैवोक्ताः भावं मनोगतं साक्षाद्व्यक्तं हेतुं व्यंजयंती पते नु भावा
इति ख्याता भ्रूविक्षेपस्मितादयः ते च तद्गुप्तचित्तं शांतवाक् बुद्ध्यारंभवाङ्गतितत्त्रगात्रारंभभेदात् चेष्टाशब्दे ॥ रामजी

क्तानन्भावात्कश्चिदित्यादिभिः श्लोकैर्वक्ष्यति शृंगाराभासश्चायमेकत्रैव प्रतिपादनात् तदुक्तं एकैवानुरागश्चेत्तिर्यङ्
म्लेच्छगतोपि वा योषितो बहुसक्तिश्च रसाभासस्त्रिधा मत इति १२ शृंगारचेष्टावमष्टभिस्तेनाप्य दर्शयंतीति कश्चिदिति क
श्चिद्राजा कराभ्यां पाणिभ्यां उपगूढनालं गृहीतनालं आलोलैश्चलैः पत्रैरभिहतास्ताडिता द्विरेफाः भ्रमरा येन तत्
तथोक्तं रजोभिः परागैरंतः परिवेषं मण्डलं बिभ्राति तेन तथोक्तं परिवेषवंति लीलारविंदं भ्रमयांचकार लीलारविंदं वर्तुल
याहं भ्रमयितव्यमिति नयाभिप्रायः हृल्लेहरणीकोयमलहाराकर्ष इत्यनुमत्याभिप्रायः १३ विस्रस्तेति विलासनशी
लो विलासी सैवकल्लसकन्यलभ इति ह्विनराप्रत्ययः अपरो राजा अंसात् स्कन्धाद्विस्रस्तं रत्नानुविद्धं रत्नखचितं यदंगदं केयूरं

कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम्। रजोभिरंतः परिवेषवंति लीलारविंदं भ्रमयांचका-
र १३ विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटिलग्नम्। प्रालंबमुत्कृष्य यथाप्रदेशं निनाय साचीकृतचा-
रुवक्त्रः १४ आकुंचिताग्रांगुलिना ततोन्यः किंचित्समावर्जितनेत्रशोभी। तिर्यग्विसंसर्पिनखप्रभेण पादेन

तस्य कोटिलग्नमग्रलग्नं आत्यात्कर्षाश्रयः कोपश्चेत्यमरः प्रलंबमृजुलंबिनीं स्रजं प्रालंबमृजुलंबि स्यात्कंठादित्य
मरः उत्कृष्योद्धृत्य साचीकृतं तिर्यक्कृतं चारुवक्त्रं येन स तथोक्तः सन् यथाप्रदेशं यथास्थानं निनाय प्रापयदोह्लेपरा
छले बाहं त्वामेव परिरप्स्य इति नयाभिप्रायः गोपनीयं किंचिदं गोपितं तो प्राह राजत इति इत्यनुमत्याभिप्रायः १५ आकुंचि
तेति ततः पूर्वोक्तादन्यो राजा किंचित्समावर्जितनेत्रशोभः ईषदवाक्पातितनेत्रशोभः सन् आकुंचिताः आभुग्ना अ
ग्रांगुलयो यस्य तेन तिर्यग्विसंसर्पिणी नखप्रभा यस्य तेन हैमं हिरण्मये पीठं विलिलेख लिखितवान् यदंगुलीनां
आकुंचनेन त्वं मत्समीपमागच्छेति नयाभिप्रायः भूमिं विलिलेख कोयमलहरा इत्यनुमत्याशयः भूमिविलेखनेन
लक्ष्मीविनाशहेतुः निवेदयतीति कश्चिद्राजा वामभुजमासनार्धे सिंहासनैकदेशे निवेश्य संस्थाप्य तत्संनिवेशात्सवा
१५

तदंसस्थानात् अधिकोन्नतो वामांस एव यस्य तथोक्तः सन् विवृत्तेन परावृत्तेन त्रिकेण त्रिकप्रदेशे भिन्नहारः लुठितहारः सन् पृष्ठवं
शाधरे त्रिकमित्यमरः सुहृत्समाभाषणतत्परोऽभूत् वामपार्श्ववर्त्तिनैव मित्रेण संभाषितुं प्रवृत्त इत्यर्थः अत एव विवृत्तत्रि
कत्वघटने तत्पया वामांगनिवेशितया सहृदयेवाङ्गीकरिष्य इति स्वपाभिप्रायः परोऽहणापराङ्मुखो येन कार्यके हाराइती
नुमत्यभिप्रायः १६ विलासिनीति अन्यो युवा विलासिन्याः प्रियायाः विभ्रमार्थं दन्तपत्रभूतं आपाण्डुरं केतकदल
दलिपिवाहमित्यमरः प्रियानितंबोचितसंनिवेशैः अभ्यस्तनिह्नवपरो नखाग्रैर्विपाटयामास अहं तन्वनितम्बमेव

र॰वं॰ टी ५९ नखव्रणादीनुद्धास्यामीति स्वपाशयः नराङ्कुरकवत् पत्रपाटको यमपलज्जाराज इतीनुमत्यागीकृतं १७ कुशेशयेति

59

निवेश्य वामं भुजमासनार्द्धे तत्सन्निवेशादधिकोन्नतांसः कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणत
त्परोऽभूत् १६ विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकपत्रमन्यः प्रियानितंबोचितसन्निवेशैर्वि
पाटयामास युवा नखाग्रैः १७ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन रत्नाङ्गुलीयप्र
भयानुविद्धानुदीरयामास सलीलमक्षान् १८ कश्चिद्यथाभागमवस्थितेऽपि स्वसन्निवेशाद्व्यतिलङ्घिनी
व वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे १९

कश्चिद्राजा कुशेशयं शतपत्रमिवाताम्रं तलं यस्य तेन शतपत्रं कुशेशयमित्यमरः रेखारूपाध्वजा लाञ्छनं यस्य तेन क
रेणाङ्गुलीभवानंगुलीयानूर्मिकाः अंगुलीयकमूर्मिकेत्यमरः जिह्वामूलाङ्गुलेश्छः इति छप्रत्ययः रत्नानामङ्गुली
यानि तेषां प्रभाय अनुविद्धान् व्याप्तान् अक्षान् पाशान् अक्षास्तु देवनाः कितवास्तु इत्यमरः सलिलं उदीरयामास उ
त्क्षिप अहं त्वया सह देवयेय इति स्वपाभिप्रायः अक्षचाञ्चल्यं काम्यकृतपदइतीनुमत्यभिप्रायः अक्षैर्मा दीव्य इति श्रुति
निषेधात् १८ कश्चिदिति कश्चिद्यथाभागं यथास्थाने अवस्थितेऽपि स्वसंनिवेशात् व्यतिलंघिनीव स्वस्थानाच्चलितम्
इव किरीटे वज्राणां किरीटगतानां अंशवो गर्भे येषां तान्यंगुलिरन्ध्राणि यस्य तमेकं करं व्यापारयामास किरीटव्यस्त

५९

ततोनृपाणामितिततोनृपाणांश्रुतवृत्तवंशाश्रुतवृत्तवंशेत्यर्थः सापेक्षत्वेपि गमकत्वात्समासः प्रगल्भा वाग्मिनीसुनंदा
ख्या प्रतिहारो रक्षतीति प्रतिहाररक्षी द्वारपालिका कर्मण्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप् प्राक्प्रथमं कुमारीमिन्दु
मतीं मगधेश्वरस्य सन्निकर्षं समीपं नीत्वा पुंवत् पुंसा तुल्यं तेन तुल्यमित्यादिना वतिप्रत्ययः अवदत् २० ततो नृपाणां
श्रुतवंशवृत्ता पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्सन्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनन्दा २० असाविति अ
सौ राजा असाविति पुरोवर्तिनो निर्देशः एवमन्यत्रापि द्रष्टव्यं शरण्यः शरणोन्मुखानां शरणार्थिनां शरणे समर्थः तत्र साधुरि
ति यत्प्रत्ययः शरणाभिलाषमर्हतीति शरण्य इति नाथनिरुक्तिः निर्मूलैव अगाधसत्त्वो गंभीरस्वभावः सत्त्वं गुणे पिशा
चादौ बले द्रव्यस्वभावयोरिति विश्वः मगधा जनपदाः तेषु प्रतिष्ठा आस्पदं यस्य स मगधप्रतिष्ठः प्रतिष्ठा कृत्यमास्पद
मित्यमरः प्रजारञ्जने लब्धवर्णो विचक्षणः यद्वा प्रजारञ्जने लब्धोत्कर्षः परान् शत्रून् तापयतीति परंतपः परंतपा
ख्यः द्विषत्परयोस्तापेरिति खच्प्रत्ययः खचि ह्रस्वः इति ह्रस्वः अरुर्द्विषदित्यादिना मुमागमः नामेति प्रसिद्धौ यथा
र्थनामा शत्रूणां संतापनादिति भावः २१ असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः राजा प्रजारंजन
लब्धवर्णः परंतपो नाम यथार्थनामा २१ काममिति अन्ये नृपाः कामं सहस्रशः संतु भूमिमनेन राजन्वतीं शोभन
राजवतीमाहुः नैतादृशः कश्चिदस्तीत्यर्थः सुराज्ञि देशे राजन्वान् स्यात्ततोन्यत्र राजवानित्यमरः राजन्वान् सौराज्ये इति
निपातनात्साधुः नक्षत्रैरश्विन्यादिभिः ताराभिः साधारणैर्ज्योतिर्भिः ग्रहैर्भौमादिभिश्च संकुलापि रात्रिश्चन्द्रमसै
व ज्योतिरस्यास्तीति ज्योतिष्मती नान्येन ज्योतिषेत्यर्थः २२ कामं नृपाः संतु सहस्रशोन्ये राजन्वतीमाहुरनेन भूमिम्
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः २२ क्रिययेति अयं परंतपोऽध्वराणां क्रतूनां क्रियाप्रबंधात्
अनुष्ठानसातत्यात् अविच्छिन्नादित्यर्थः अजस्रं नित्यमाहूतः सहस्रनेत्रः सन् चिरं शच्या अलकान् पाण्डुकपोलयोर्लं
बान् सत्वान् पचाद्यच् मंदारैः कल्पद्रुमकुसुमैः शून्यांश्चकार प्रोषितभर्तृका हि केशसंस्कारं न कुर्वन्ति प्रोषिते मलिन
ना केशसंस्कारादिति भावः २२ क्रियाप्रबंधादयमध्वराणाम

र॰वं॰
टी॰६॰
60

अस्त्वमाहूतसहस्त्रनेत्रः शच्याश्चिरंपाण्डुकपोललम्बान्मंदारशून्यानलकांश्चकार २३ अनेनचेदिच्छसिगृह्यमाणंपाणिंवरे।
रोपनकुरुप्रवेशे प्रासादवातायनसंश्रितानांनेत्रोत्सवंपुष्पपुरांगनानाम् २४ अनेनचेदिति वरेरोपनवरणीयेनहरण
नेवैराणादिवप्ररणप्रत्ययः अनेनराज्ञागृह्यमाणंपाणिमिच्छसिचेत्पाणिग्रहणमिच्छेत्यर्थः प्रवेशेनगरप्रवेशकाले
प्रासादवातायनसंश्रितानांराजभवनगवाक्षस्थितानांपुष्पपुरांगनानांपाटलीपुत्रांगनानांनेत्रोत्सवंकुरु सर्वेत्रमाना
नासामपिदर्शनीयाभविष्यसीतिभावः २४ एवमिति एवंतयासनेदयोक्ते सुन्नितंपरंतपमवेक्ष्यकिंचिद्विस्रंसिनीदूर्वा।
काङ्कवाचिह्नामधूकमालागुडपुष्पमालायस्याःसामधूकेगुडपुष्पमधुद्रुमावित्यमरः वरोऽपिशिथिलप्रयत्नेतिभावः
तन्वीइन्दुमतीएनंनृपमभाषमाणाऋज्वाभावस्पष्टयाप्रणामक्रिययाप्रत्यादिदेशपरिजहार २५ एवंतयोक्तेतमवे
क्ष्यकिंचिद्विस्रंसिदूर्वाङ्कमधूकमाला ऋजुप्रणामक्रिययैवतन्वीप्रत्यादिदेशैनमभाषमाणा २५ तामिति सैवना।
न्यचित्तज्ञत्वादितिभावः वेत्रग्रहणेनियुक्तादौवारिकीसुनन्दातांराजसुतांराजान्तरंअन्यराजानंनिनायनयतिर्द्विकर्म
कः कथमिवसमीरणोत्थावातोत्पन्नातरंगलेखाऊर्मिपंक्तिःमानसेसरसिस्थिताराजहंसींतांपद्मान्तरमिव २६ तांसैववे
त्रग्रहणेनियुक्ताराजान्तरंराजसुतांनिनाय समीरणोत्थेवतरंगलेखापद्मान्तरंमानसराजहंसीम् २६ जगादचैना।
मयमंगनाथःसुरांगनाप्रार्थितयौवनश्रीः विनीतनागःकिलसूत्रकारैरैन्द्रंपदंभूमिगतोपिभुंक्ते २७ जगादचैना
मिति एनामिन्दुमतींजगादकिमिति अयमंगनाथोङ्गदेशाधीश्वरःसुरांगनाभिःप्रार्थिताकामितायौवनश्रीर्यस्यतथो
क्तःपुराकिलेनमिन्द्रसहायार्थमिन्द्रपुरगामिनमंकामयंतेस्मापसरसइतिप्रसिद्धिः किंचसूत्रकारैर्गजशास्त्रकृद्भिःपाल
काप्यादिभिर्महर्षिभिर्विनीतनागःशिक्षितगजःकिलेत्यलीके अतएवभूमिगतोपिऐन्द्रपदमैश्वर्यंभुंक्ते भूलोकस्यए
वस्वर्गसुखमनुभवतीत्यर्थः गजाःसर्वेदेवर्षिसेव्यत्वमैन्द्रपदशब्दार्थः पुराकिलकुलस्थ्यच्छायाकारणात्भवमवती। ६०
रौदिग्गजवर्गमालोकस्वयमशक्तैरिन्द्राभ्यर्थनयास्मानीतैर्देवर्षिभिःप्रणीतेनशास्त्रेणगजान्वशीकृत्यभविसंप्रदा.

अनेनेति शत्रुविलासिनीनां स्तनेषु मुक्ताफलस्थूलतमान् अश्रुबिंदून् अस्तमग्र्याणीति विग्रहः पर्यासयता प्रस्तारयता भर्तृ
वधादिति भावः अनेन अंगनाथेनोन्नत्याहित्य सन्देरा विनैव विनाहारा एव प्रत्यर्पिताः अविच्छिन्नाश्रुबिंदुप्रवर्तनात् उन्न
त्नहारार्थ्यतामेव कृतमेव मुक्ताहारा गम्यते २८ अनेन पर्यासयताश्रुबिंदून् मुक्ताफलस्थूलतमान् स्तनेषु प्रत्यर्पिताः स्थूल
विलासिनीनां मा हित्य सन्देरा विनैव हाराः २८ निसर्गभिन्नेति निसर्गतः स्वभावतः भिन्ना आस्पदं भिन्ना आश्रयो महानवस्थान
विरोधीत्यर्थः श्रीश्च सरस्वती चेति द्वयमस्मिन्नंगेश्वर एकत्र संस्थाय स्थितिर्यस्य तदेकसंस्थं उभयं इह संगतमित्यर्थः हे कल्या
णि वह्वादित्वान् ङीप् कांत्या सूनृतया सत्यप्रियया गिरा च योग्या संसर्गत्वमेव तयोः श्रीः सरस्वत्योः तृतीया समानगुणात् यु
वयोर्दंपत्यं युज्यत इति भावः दक्षिणानायकत्वं वास्य ध्वन्यते तदुक्तं तुल्यो नैकत्र दक्षिणा इति २९ निसर्गभिन्नास्पदमेक
संस्थमस्मिन् द्वयं श्रीश्च सरस्वती च कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया २९ अथेति अथ कु
मारी अंगराजात् चक्षुरवतार्य अपनीयेत्यर्थः जनन्यामातृसखीं सुनंदां याहि गच्छेत्यवदत् अथवा जनीं वधूं वहतीति ज
न्याः जन्याः वधूबांधवाः तान् वा गच्छेत्यवदत् जन्या मातृसखी मुदोजन्यो वरवधूज्ञातिप्रियनृत्यहिते पि चेति यद्वा इयेति
विग्रहः अथवा जन्याः वधूमन्याः भन्या स्नापितवोढा इति केशवः संजायाजन्या इति यत्प्रत्ययांतो निपातः यदाह हेम्ना
कारः जनीं वधूं वहतीति जन्याजामातुर्वयस्या इति यच्चामरः जन्या स्निग्धा वरस्य च इति तन्नसर्वमुपलक्षणार्थं इत्यविरो
धः न चायमंगराजनिषेधो हत्यपदोषात् नापि दृष्टदोषात् इत्याह नेत्यादिना असौ अंगराजः काम्यः कमनीयो नेति नकिंतु
कास्पदमेवेत्यर्थः सा कुमारी च सम्यक् द्रष्टुं विवेक्तुं न वेदेति न वेदेत्यर्थः किंतु लोको जनो भिन्नरुचिर्हि रुचिरमपि कंचि
त्कस्मैचिन्न रोचते किं कुर्मो न हीच्छा नियंतुं शक्यत इति भावः ३० अथांगराजादवतार्य चक्षुर्याहीति जन्यामवदत्कु
मारी नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ३० ततः परमिति ततोनंतरं प्रतिहारभूमौ द्वारदेशा
नियुक्ता दौवारिकी स्त्री दार्ढ्यं प्रतीहारं इत्यमरः द्विषां शत्रुभिः दुःसहं दुःसहमित्यर्थः विशेषेण आदर्शं दर्शनीयं रूपवंतमिं

र.वं.
टी. ६१
61

ततः परं दुःप्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ निदर्शयामास विशेषकान्तमिन्दुं नवोत्थानमिवेन्दुमत्यै ३१ अवंतिना-
थोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ३२ अवंति-
नाथ इति उदग्रबाहुर्दीर्घबाहुः विशालवक्षाः तनुवृत्तमध्यः कृशवर्तुलमध्यो यं राजा अवंतिनाथः अवंतिदेशाधीश्वरः
त्वष्ट्रा विश्वकर्मणा भर्तृस्नेहाद्वेगमसहमानया दुःखासंज्ञया देव्या प्रार्थितेनेति शेषः चक्रभ्रमं चक्राकारं शस्त्रोल्लेखनयं-
त्रं भ्रमोम्बुनिर्गमे भ्रांतौ कुन्दगराख्यशिल्पियंत्रके इति विश्वः आरोप्य यत्नेनोल्लिखितः उल्लिखितांगः उष्णतेजाः सूर्य इव भाति
अत्र मार्कंडेयः विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वता भ्रममारोप्य तत्तेजः शातनायोपचक्रमे इति ३२ अस्य प्रया-
णेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि कुर्वंति सामंतशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ३३ अस्येति
समग्रशक्तेः शक्तित्रयसंपन्नस्यावंतीनाथस्य प्रयाणेषु जैत्रयात्रासु अग्रेसरैर्वाजिभिरश्वैरुत्थितानि रजांसि सामंतानां
सामंतनाथानां राज्ञां शिखामणयः चूडामणयः तेषां प्रभाप्ररोहास्तमयं तेजोंकुरनाशं कुर्वंति नश्वरैरेवास्य शत्रु-
वः पराजयंत इति भावः ३३ असौ महाकालनिकेतनस्य वसन्नदूरे किल चंद्रमौलेः तमिस्रपक्षेपि सह प्रियाभिर्ज्यो-
त्स्नावतो निर्विशति प्रदोषान् ३४ असौ महेति असाववंतीनाथः महाकालेनाम स्थानविशेषे तदेव निकेतनं स्थानं य-
स्य तस्य चन्द्रमौलेरीश्वरस्य अदूरे समीपे वसन् अत एव हेतोस्तमिस्रपक्षे कृष्णपक्षेपि प्रियाभिः सह ज्योत्स्नावतः प्र-
दोषान् रात्रीर्निर्विशति अनुभवति किल नित्यज्योत्स्नाविहारत्वमस्यैव नान्यस्येति भावः ३४ अनेन यूना सह पार्थि-
वेन रम्भोरु कच्चिन्मनसो रुचिस्ते सिप्रातरंगानिलकंपितासु विहर्तुमुद्यानपरंपरासु ३५ अनेनेति रंभे कदलीस्तं-
भाविव ऊरू यस्याः सा रंभोरूः तस्याः संबुद्धिः हे रंभोरु ऊरूत्तरपदादौपम्य इत्यूङ् प्रत्ययः नदादित्वाद्ध्रस्वः यूना अनेन पा-
र्थिवेन सह सिप्रानाम तत्रत्या नदी तस्यास्तरंगाणामनिलेन कंपितासु उद्यानानां परंपरासु पंक्तिषु विहर्तुं ते तेन नव मन- ६१
सो रुचिः कच्चित् स्पृहास्ति किमित्यर्थः अभिषंगे स्पृहायां च गभस्तौ च रुचिः स्त्रियामित्यमरः ३५ तस्मिन्नभिद्योति-
तबंधुपद्मे प्रतापसंशोषितशत्रुपंके बबंध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ३६ श्रीरामजी

नस्मिन्निति उत्तमसेकुमार्य्याउत्फुल्लांगमाद्दृवासाइन्दुमती कुमुद्वती वस्त्रभि धेयाभिनाउल्लसितावेष्वर्षमानियेनतस्मिन्प्रा
तापेनतेजसा संशोषिताः शत्रवः पङ्काः कर्दमा येनतस्मिन्नवन्निनाथे कुमुद्वती कुमुदनउवेनसेभ्योऽम्नतुप्प्रत्ययः भानेम
तीवच्छस्मतीवभावच्छिन्नेनवबन्धनतत्रानुरागेकरोतीत्यर्थः बन्धनापमत्वेनशङ्काणांपङ्कत्वेनचनिरूपणाद्रूपकः सद्भ्यमा
मार्थः ३६ नामग्रतस्तामरस्मन्तरा भामनूपराजस्यगुणैरनूनां विधायसृष्टिं ललितां विधातुर्जगाद भूयः सुदतीं सुनन्दा।
३७ नामग्रतइति सुनंदानामरसांतराभांपद्मोदरकल्पकांतिकनककगौरीमित्यर्थः गुणैरनूनां नामधेयकामित्यर्थः शोभनादं
तायस्याः सासुदती वयसिदन्तस्यदतृ इतिदत्रादेशः उगितश्चेति ङीप् एतामकुतां प्रसिद्धां गाविधातुर्ललितां सृष्टिं मथकर
निर्माणशक्तिमित्यर्थः अनुगतां आपाये पुत्रेस्मनूपानामदेशाः कच्छप्रचुरदेशास्तत्यादि नाम्नः प्रत्ययः ऊदनोदेशे इत्यूका
रादेशः तेषांराज्ञोऽनूपस्याग्रतो विधायव्यवस्थाप्य भूयः पुनर्जगाद ३७ संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखा
तयूपः अनन्यसाधारणराजशब्दो बभूव योगीकिलकार्त्तवीर्य्यः ३८ संग्रामेति संग्रामेषु युद्धेषु निर्विष्टात्र्यनुभूताः
सहस्रंबाहवो यस्य सतथोक्तः युद्धादन्यत्र द्विभुजएव दृश्यत इत्यर्थः अष्टादशसु द्वीपेषु निखातायूपा येन सतथोक्तः
सर्वक्रतुयाजी सार्वभौम इतिभावः जरायुजादिसर्वभूतरंजनादनन्यसाधारणोराजशब्दोयस्यसतथोक्तः योगीब्रह्म
विद्वान्नित्यर्थः सकिलभगवतो दत्तात्रेयाल्लब्धयोगः इतिप्रसिद्धिः कृतवीर्य्यस्यापत्यं पुमान् कार्त्तवीर्य्यो नामराजा
बभूवकिलेतिश्रयं चास्य महिमा सर्वोपिदत्तात्रेयवरप्रसादलब्ध इतिभारते दृश्यते ३८ अकार्यचिन्तासमकाल
मेवप्रादुर्भवंश्चापधरः पुरस्तात् अन्तःशरीरेष्वपियः प्रजानां प्रत्यादिदेशाविनयं विनेता ३९ अकार्यचिन्तेति वि
नेता शिक्षकोयः कार्त्तवीर्य्यस्यासत्कार्य्यचिन्तया करिष्यामीति बुध्यासमकालमेककालमेव यथा तथा पुरस्तादग्रे
चापधरः प्रादुर्भवन् प्रजानां जनानां प्रजास्यात्संततौ जनेतौ जन इत्यमरः अन्तःशरीरेषु अन्तःकरणेषु शरीरशब्दे
हेनेन्द्रियेलक्ष्यते अविनयमपि विकर्म्मापि प्रत्यादिदेशमानसापराधमपि निवारयामासेत्यर्थः अन्ये तु वाकायाप
राधमात्र प्रतिकर्त्तारइतिभावः ३९ ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण कारागृहे निर्जितवासवेन

ज्यावंधनिष्पंदेति ज्यायामौर्व्यां बंधनेन निष्पंदा निश्चेष्टा भुजा यस्य तेन विनिःश्वसता ज्यावंधो पपदोधात् दीर्घं निःश्वसतीव कृपवं
परादशमुखी यस्य येन निर्जितं मवासवेन इंद्रविजयिना अत्रेन्द्राद् योध्येन न जितमप्राय एवेति भावः लंकेश्वरे रावदशास्ये
नयस्य कारागृहे वंधनागारे कारास्याद्वन्धनालयइत्यमरः आप्रसादादनुग्रहपर्यन्तमुषितं स्थितेन पुंसके भावे क्तः
र॰वे॰ एतत्प्रसाद एव तस्य मोक्षोपायो नान्यदस्त्रमिति भावः ४० तस्यागत्यैव भूपतिरेव जातः प्रतीयइत्याग महद्दसेवी येना
टी॰ ६२ श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४१ तस्यागत्येति आगमवृद्धसेवी श्रुतवृद्धसेवी सेवकः प्रती
पइति ख्यातः इति शेषः एवभूपतिस्तस्य कार्त्तवीर्यस्यान्वये वंशे जातः येन प्रतीपेन संश्रयस्य प्रमोदोषे व्यसनादिभिः
62 रूढमुत्पन्नं श्रियः संवेधि स्वभावलोला प्रकृतिचंचलेत्येवंरूपं अयशो दुःकीर्त्तिः प्रमृष्टमिति संदृष्टाश्च यत्त्यागशी
लायाः श्रियः प्रकृतिचापलप्रवादो मूढजनपरिकल्पितइत्यर्थः अयं तद्दोषपरिहृत्यान्तक दापि श्रियामप्युज्यते
इतिभावः ४१ आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम् धारां शितां रामपरश्वधस्य संभावयत्यु
त्पलपत्रसाराम् ४२ आयोधनेति यः प्रतीप आयोधने युद्धे कृष्णगतिं कृष्णवर्त्मानमग्निं सहायमवाप्य क्षत्रिया
णां कालरात्रिं महारात्रिमित्यर्थः रामपरश्वधस्य जामदग्न्यस्य परशोः द्वयोः कुठारः स्वधितिः परशुश्च परश्वध
इत्यमरः निशितां तीक्ष्णां धारां मुखं कृपाणादीनां च निशितमुखे धारा प्रकीर्त्तितेति विश्वः उत्पलपत्रस्य सार इव सा
रो यस्याः तां तथाभूतां संभावयति मन्यते एतन्न्वरं जिगीषं यागतान् रिपून् स्वयमेव यत्स्यामीति भगवतो वैश्वान
रे सादनत्रवतो येरा जादह्यतेते न पागताः शत्रवः इति भारते कथानुसंधेया ४२ अस्याङ्कलक्ष्मीर्भव दीर्घबाहो माहि
ष्मतीवप्रतिमस्य काञ्चीम् प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामम् ४३ अस्यामिति दीर्घबा
हो रस्य प्रतीपस्याङ्कलक्ष्मीर्भव एनं वरीष्वेत्यर्थः अनेनायं विलम्बत्वइति ध्वन्यते माहिष्मतीनामास्य नगरीत
स्यावप्रः प्रकार इव नितंवः तस्य काञ्चीरसनाभूतां जलानां वेणी प्रवाहैः न रम्या उदग्रः प्रवाहो वेणी चेति हलायुधः ६२
रेवां नर्मदां प्रासादजालैर्गवाक्षैः जालसमूह आनाये गवाक्ष जालकावपीत्यमरः प्रेक्षितुं कामः इच्छास्ति यदि

पीत्यर्थः सद्वितीयाः शरदा प्रमृष्टांबुधरोपरोधः निरस्तमेघावरणः पर्याप्तकलः संपूर्णकलः शशी नलिन्या इव तस्या इन्दुमत्याः रुचये न ब
भूव रुचिं नाजीजनदित्यर्थः लोकाभिन्नरुचिरिति भावः ४४ तस्याः प्रकामं प्रियदर्शनोपि न स क्षितीशो रुचये बभूव शरत्प्र
मृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ४४ सा शूरसेनाधिपतिं सुनन्दामुद्दिश्य लोकान्तरगीतकीर्तिम् आ
चारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ४५ साशूरसेनेति लोकान्तरे स्वर्गादावपि गीतकीर्तिमाचारेण शु
द्धयोरुभयोर्वंशयोर्मातृपितृकुलयोर्दीपं प्रकाशकं उभयवंशोत्थैरुभयपक्षवन्हिर्वोढः शूरसेनानां देशानामधिप
तिं सुनन्दा नामोद्दिश्याभिमुखाय शुद्धान्तरक्ष्यान्तःपुरपालिकया कंमर्मिरापरिणी[illegible]डीप सा कुमारी जगदे ४५
नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण सिद्धाश्रमं शान्तमिवैत्य सत्वैर्नैसर्गिकोप्युत्ससृजे विरोधः ४६
यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्टा हर्म्याग्रसंरूढतृणांकुरेषु तेजोविषह्यं रिपुमन्दिरेषु ४७
नीपान्वय इति यज्वा विधिवदिष्टवान् यज्ञोर्हः निष्पन्नत्वयः एष पार्थिवो नीपानामन्वयोस्येति नीपान्वयः नीपवंश
जः यं गुणाः मामाश्रित्य गुरोर्ज्ञानमौनादिभिः शान्तप्रसन्नं सिद्धाश्रममेकत्र आश्रममेत्य प्राप्य सत्वैर्गजसिंहादिभिः प्रा
णिभिरिव नैसर्गिकः स्वाभाविकोपि परस्परेण विरोधः उत्ससृजे त्यक्तः ४६ यस्येति हिमांशोः कान्तिश्चन्द्रकिरणा इव
नयनयोरभिरामा यस्य [illegible]रास्य कान्तिः शोभा आत्मगेहे स्वभवने संनिविष्टा संक्रान्ता अविषह्यो विशोढुमशक्यं तेजः
प्रतापस्तु हर्म्याग्रेषु संरूढास्तृणांकुरा येषां तेषु शून्येष्वित्यर्थः रिपुमन्दिरेषु संनिविष्टः स्वजनाह्लादको द्विषन्तापनश्चेति
भावः ४७ यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले कलिन्दकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव
भाति ४८ यस्येति यस्य अवरोधस्य वारिविहारकाले क्रीडासमये अवरोधानां अन्तःपुराङ्गनानां स्तनेषु चन्दनानां मलय
जानां प्रक्षालनाद्धेतोः कलिन्दो नाम शैलस्तस्य कन्या यमुना यद्वा कलिं दोषं द्यति खंडयतीति कलिंदः सूर्यस्तस्य कन्या यमु
ना कालिन्दी सूर्यतनया यमुना शमनस्वसेत्यमरः मथुरायां गंगाभावं संचयत्यपि शाद्वहः कालिन्दीतीरे मथुरा लवणासुरवध

तस्य

तं॰ ५८

कालेशत्रुद्वेषेन निर्माणस्यत इति वक्ष्यति तत्कथं मधुना मधुरा संभव इति चिंत्यं मधुरा मधुराधुरीति शब्दभेदप्रकाशे यद्वा सामा
न्येति मधुरानामास्य पुरी ज्ञेन गरीगं तापि गंगा याविप्रकृष्टामित्यर्थः गंगाया भागीरथ्या कृष्णोर्मिभिः संसक्तजलेव भाति यव
लचंदनसंसर्गात् प्रयागादन्यत्रापि यत्र गंगासंगतेव भातीत्यर्थः सितासिते तद्धि गंगायमुने निश्रेयसपदः ४८ ज्ञाते न ता ह्यो
र॰वे॰ त्किल कालियेन मर्गोविनष्टं यन्मनोज्ञ मायः वहस्थलव्यापिकुचंदयानाः सकोलभं भेकूपयतीव विस्मम् ४९ ज्ञातेनो
टी॰ ६३ ति ताह्योकृष्णज्ञानत्रस्तेन यन्मनोज्ञः स्थाने यस्तेन कालियेन नाम्ना नागेन विनष्टं किल भ्रमयदानतिष्ठु यस्वेनद
